श्रीः।

परमसिद्धान्तः।

(ब्रह्मांडकटाहांतर्गतज्योतिश्चक्रज्ञानम्)

श्रीलक्ष्मीवल्लभात्मजप्रेमवल्लभविरचितः

सोऽयं

खेमराज श्रीकृष्णदास इत्यनेन

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये

मुद्रयित्वा प्रकाशितः।

संवत् १९५३, शके १८१८.

प्रस्तावना.

भूतलनिवासिनां सर्वेषां विदुषां पुरतो योऽयं ग्रन्थ उपस्थाप्यते, अस्याभिधानं च "परमसिद्धान्तः" इति। अयं ग्रन्थश्च विद्वद्वरश्रीलक्ष्मीवल्लभात्मजप्रेमवल्लभमहाशयैर्नानाविधज्योतिःशास्त्रग्रन्थान्निर्मथ्य नवीनपाश्चात्त्यज्यौतिषिकपरिशीलितज्योतिश्चक्रविज्ञानं चातिनिपुणया बुद्ध्यावगाह्य सकलब्रह्माण्डकटाहान्तर्वर्तिगोलसमूहपरिमिति–व्यायति–गति–स्थिति–देशज्ञान–प्रभृतिसर्वविषयसविस्तरविचारसरणिविभूषितो व्यरचि। एतेषां विद्वद्वर्याणामयं परिश्रमः कस्य सचेतसश्चेतश्चमत्कारं न गमयेत्। आर्यभट–भास्कराचार्य–प्रभृतिमहानुभावानां किल पंक्तिमर्हन्ति महान्तोऽमी पण्डितमण्डलाखण्डलायमानाः परावरज्ञाननिष्णाताः श्रीप्रेमवल्लभपण्डिता इति सानन्दं धन्यवादेन घोघुष्यते।

सोऽयं "परमसिद्धान्त" नामा ज्योतिश्चक्रज्ञानप्रतिपादको ग्रन्थः पण्डितवर्यैर्विरच्य लोकोपकारायास्य प्रसिद्धये मत्सविधे संप्रैष्यत। स चायं मया स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाशमानीयत।

अतः परमभ्यर्थयामि च सर्वाञ्ज्योतिर्विदो विदुषश्च–वास्तवतोऽमूल्यस्यापि परावरज्ञानप्रकाशकस्यास्य ग्रन्थस्य संग्रहाय पदं दत्वा प्रोक्तपण्डितानां सफलयन्तु भूरिपरिश्रमान् इति। शम्।

सकलविद्वज्जनप्रेमाभिलाषी–

खेमराज श्रीकृष्णदास,

"श्रीवेङ्कटेश्वर" मुद्रणालयम्–मुम्बई.

श्रीः ।

अथ

परमसिद्धान्तानुक्रमणिका ।

इति परमसिद्धान्ते गणितभागाधिकारः प्रथमः ॥ १ ॥

विषयाः	पृष्ठाङ्काः

इति परमसिद्धान्ते ग्रहणाधिकारे-चतुर्दशः ॥ १४ ॥

इति परमसिद्धान्ते पातयोगाधिकारः पञ्चदशः॥१५॥

इति परमसिद्धान्तानुक्रमणिका समाप्ता ।

अथायनांशानयनम्

सृष्ट्यारम्भक्षणाद्यातवत्सरान्खखषड्गुणैः भक्ता
स्यादम्बरव्यग्रफलं त्र्युन्मितं प्रथमम् १३३ सृष्ट्या
रम्भक्षणादेवं शाके भूद्व्यब्धिसम्मिते मार्गश्चावृ-
त्तिभिर्भूखवेदवाब्ध्यक्षमितैस्तथा १३४ यातोऽत्र-
त्वत्ततः सृष्ट्यारम्भतोगतवत्सराः शेषिताः खख
युग्माश्वैर्भुक्ताऽवयवसंयुताः १३५ खखवत्तर्कोद्धृता
भाद्यस्यात्तत्तौल्यऽजपूर्वकम् स्वर्णकं जायते तस्य
बाहुर्भाद्यनवाहतम् १३६ कृत्वा तद्वत्तु भागाः स्यु
रंशाद्यास्तु यमाहताः स्युःपथस्य कलाद्याश्च माभ-
क्तास्ताश्रमाधिकाः १३७

अथ पक्षान्तरेणायनांशाः

वाह्नौघं द्व्यक्षषट्पञ्चतानैर्युक्तं गुणं भवेत् खा-
श्राष्टाब्ध्यंगभिर्हत्वा गुणं तं भूदिनैर्भजेत् १३८
लब्धं भागमुखं नागशून्यचन्द्रैस्तु शेषितम् वेद-
बाणेभ्य अल्पोऽर्द्धं स्वर्णपूर्वापरं भवेत् १३९ तद्भा

लंचस्वतः सिद्धं तद्दस्रोर्द्धं यदातदा तद्वेदाक्षेन्तरासिं-
द्धंचेन्दुनागाऽधिकं तदा १४० तन्नागाभाञ्जवि-
श्लेषान्मार्गमंशासुख भवेत् मार्गांशात्त्ययनांशाश्च
पश्यभागाः प्रकीर्त्तिताः १४१ अयनांशोपपत्तिः
राशिचक्रस्य भागानाम्मध्ये ह्येकांशकस्यतु विलि-
प्तैर्वेदपंचैस्तुतुल्यं वर्षेऽन्तरं भवेत् १४२ पूर्वस्यांराशि
चक्रस्य पूर्वाख्यैः पश्यभागकैः पश्चिमायां पश्यांशै-
स्तु पश्चिमाख्यैश्च निश्चयात् १४३ मार्गांशाः सप्त-
नेत्रोर्द्धाः यावच्चन्द्रेभगजोन्मिताः तावत्पश्यांशकाः प-
श्चात्सन्मुखा वक्रवेगजाः १४४ मार्गांशाः स्युः कु-
नागोर्द्धाः यावद्भागदिगुन्मिताः भैस्तुल्याश्चाऽपिया-
वच्चतावत्प्राङ् मार्गवेगजाः १४५ भानिशून्याऽ
यनांशेतु चक्रे स्वस्थानगाः स्मृताः तेस्वस्वस्थान
तोभानिपूर्वमार्गांशकोन्मितैः १४६ चक्रे पूर्वस्थि-
ताः प्रोक्ताः पश्चात्पृष्ठपश्यांशकैः **दिनज्ञानम्**
सूर्योदयाऽस्तयोर्मध्यलिप्सा दिनमुदीरितम् १४७

अथपरमसिद्धान्तः प्रारभ्यते.

ॐ श्रीगणेशायनमः दन्तीवक्रानन नत्वा गणेशंदेव-
वन्दितम् श्रेष्ठंपरम सिद्धान्तं करोमि मनन प्रियम् १
यज्ञा वेदोदिताःयस्मात्सुर्यज्ञाः समयाश्रयात् त-
त्कालंज्योतिषाधीनंवेदाङ्गंज्योतिषंततः २ शब्दशा-
स्त्रंमुखंतस्यतन्नेत्रेज्योतिषंमतम् निरुक्तंश्रवणंत-
स्यकल्पंवेदकरौमतं ३ शिक्षातन्नासिकाङ्गेयाछन्द
स्पादद्वयंमतम्. हीनंनेत्रद्वयं[1]यस्य कर्णाद्यैःकिंपरा-
क्रमम् ४ भवत्यऽस्माद्द्विजःपूर्वंज्योतिषंप्रपठेत्ख-
लु तत्पश्चान्निजवेदाद्यं शास्त्रंतदऽखिलंपठेत् ५
गणितेनाऽखिलंकर्ममात्रमऽस्तियतस्ततः अस्मि-
न्परमसिद्धान्ते वच्म्यादौगणितांशकम् ६

अथपरिभाषा.

गुञ्जाभिःपंचभिर्माषैंते भूपैः कर्षमीरितं माषैर्वेदोन्मि
तैःसाणंतद्वयंकोलमुच्यते ७ कर्षोन्मितंसुवर्णं तु-

१ न्यासोपदेशान्मूकःसर्वंकरोतिकिमन्धः पाटीय गणितमेकाक्षिःगोलगणितस्त्वपर
नेत्रः अनयोर्मध्ये ह्ये कहीनस्तुकाण इत्युच्यते.

सुवर्णसमुदीरितम् कर्षैर्वेदमितैर्लोके पलं सुन्दरि विच
क्षणैः ८ गुञ्जाभिः षड्भिरेकैः सेटंतैः षण्णवैर्मितम्
भूपांशं सेटकस्यैव षट्टंकं समुदीरितम् ९ सेटैः पं-
चोन्मितैस्तौल्ये पण्डितैर्धटिका स्मृता शून्यवेदमितैः
सेटैस्तत्तौल्ये मणमीरितम् १० तौल्यं टंकमितं स्व-
निष्कं तन्मितहाटकम् मौल्ये भूपपणैर्द्रम्मं तैर्भूपैर्नि-
ष्कमीरितम् ११ अष्टभिस्तण्डुलैर्गुञ्जा गुञ्जाऽर्द्धयवं
मुच्यते त्रिगुञ्जं वल्लमाख्यातं तैरष्टैर्धरणोच्यते १२
भानुभिर्मुष्टिभिर्मानं तद्वेदैः प्रस्थ उच्यते तैर्भूपैश्चो-
दितं द्रोणं तद्भूपैः खारिका भवेत् १३ अञ्जलिर्मुष्टिभि
स्तैकैस्तद्द्वयं कुडवोच्यते तैर्वेदैर्नालिका ताभिः एवं
राढकोच्यते १४ तद्युगैर्भारमाख्यातं तत्पीडायोच्यकी-
र्त्तिता अष्टभिस्तिलविस्तारैर्यवविस्तारमीरितं १५
अष्टभिर्यवविस्तारैरंगुलव्यासमीरितम् तैर्वेदाश्विर-
मैर्हस्तदैर्घ्यं हस्तमुदीरितम् १६ इत्थमंगुलविस्ता-
रमंगुलं समुदीरितम् हस्तैर्वेदमितैर्दण्डं हस्तैर ऽ अ-

स्वरवीरगैः १७ क्रोशैः स्यात्क्रोशयुग्मन्तु गव्यूतिः परिकीर्तिता योजनं चाब्धिभिः क्रोशैर्वंशः स्याद्दशभिः करैः १८ क्षेत्रं वेदभुजैस्तुल्यैर्निबद्धकीर्तितं बुधैः विस्तारे ह्येकहस्तः स्याद्दैर्घ्ये चैकेकरस्तथा १९ वेधेत्वेकैकरस्तन्तु ह्येकहस्तं घनोच्यते एकहस्तघनो भाण्डोमगधेरवारिका भवेत् २० प्रसिद्धालोकतोज्ञेया परिभाषा यथोचिता इति परिभाषा.

अथांकसंख्यासंज्ञा.

एको दश शतञ्चाऽथ सहस्रस्त्वऽयुतस्तथा २१ लक्षश्च प्रयुतः कोटिरऽर्बुदश्चाऽब्जसंज्ञकः खर्वाख्यश्च निखर्वश्च महापद्माह्वयः किल २२ शंकुर्जलधिसंज्ञश्च ह्यन्त्यमध्याभिधं तथा परार्द्धं चेतिविज्ञेयाश्चैतेंकाः दिग्गुणोत्तराः २३

अथयोगान्तरकरणम्

योगोऽन्तरं यथास्थानंक्रमाद्वोत्क्रमतो भवेत् उदाहरणम्— दशपञ्चद्वादशशतानां योगं तदऽयुतां

न्हीनंवद् न्यासः १०।५।१२।१०० एषांयोगेजातम्
१२७ इदमयुताद्धीनेजातं ९८७३.

अथ गुणनम्

गुणे नोत्सारितेनैव हन्याद्गुण्यंक्रमोत्क्रमात् २४
स्वेच्छयागुणखण्डैर्वाहत्वा गुण्यं पृथक् पृथक् तदै-
क्यंवाभवेद्हन्तोगुणः शुद्ध्यतियेनच २५ तेनलब्ध्या
चतद्गुण्यंहत्वातज्जायतेथवा स्थानस्थैर्गुणकस्यै-
वह्यङ्कैर्हत्वापृथक्पृथक् २६ गुण्यंकृत्वायथास्था-
नमैक्यंतज्जायतेथवा हत्वागुण्यंगुणेनैवहीष्टेनाढ्ये
नतत्फलम् २७ इष्टेनगुणितंगुण्यंयुक्ताहित्वातु-
दाभवेत् उदाहरणम्— पंचार्करविभिर्हत्वातद्धा-
नुभिर्भक्तावद् न्यासः गुण्यः १२५ गुणकः १२ गु-
णेनोत्सारितेनेतिकृतेजातं १५०० अथवा गुणख-
ण्डेकृते ५७ आभ्यां पृथक् गुण्ये गुणिते युतेचजा-
तंतदेव १५०० अथवा गुणकश्चतुर्भिर्भक्तोलब्धं३
एभिश्चतुर्भिश्च गुण्येगुणितेजातंतदेव १५०० अ-

थवास्थानविभागेखण्डे १।२ आभ्यांपृथग्गुण्ये गुणितेयथास्थानयुतेचजातंतदेव १५०० अथवा चतुरूनेन ८ गुणेन चतुर्भिश्चपृथक् गुण्ये गुणितेयुतेच जातंतदेव १५०० अथवाद्वियुक्तेनगुणेन १४ गुण्ये गुणिते द्विगुणित गुण्यहीनेच जातंतदेव १५०० इति गुणनप्रकारः अथ भागहारविधिः

छेदः शुद्ध्यति भाज्याऽन्त्याद्यद्गुणस्तत्फलं भवेत् २८ केनाऽपवर्त्यतुल्येन छिद्भाज्यौ सम्भवे भजेत् उदाहरणंन्यासः भाज्यः १५०० भाजकः १२ भजनाल्लब्धोगुणः १२५ अथवा भाज्यहारौत्रिभिरऽपवर्त्तितौ ५००/४ चतुर्भिर्वा ३७५/३ षड्भिर्वा २५०/२ स्वस्वहारभक्ताः फलंतदेव १२५ वर्गरीतिः - स्वघ्नंवर्गोच्यते घनरीतिः वर्गो मूलघ्नस्तु घनो भवेत्-२९ वर्गोदाहरणम् — नवानां विश्वतुल्यानां अष्टांकरामाणां पंचाग्रेकरवत्रयैका णांवर्गान्वद न्यासः ९।१३।३९८।१०००१०५ एषां यथोक्तकरणेनजाताः वर्गाः ८१।१६९।१५८४०४।

१००० २१०० ११०२५ पुनर्धनरीतिः तुल्यराशित्र-
यवधंगीयतेतद्घनंबुधैः पुनर्वर्गरीतिः तुल्यराश्योस्तु
यद्घातंतद्वर्गपरिकीर्त्तितं ३० स्थोर्द्ध्वस्थाप्याऽन्त्यव-
र्गस्तुद्वि घ्नोऽन्त्युघ्नान्तथाऽपरान् पीत्वाऽन्त्यन्तुततो
त्सार्यदक्षचैकस्थलाऽन्तरे ३१ इत्थंराश्यंऽकपर्य्य-
न्तंकृत्वास्यान्तद्युतिः कृतिः प्रकारान्तरेणधनरीतिः
स्थाप्याऽन्त्यस्यघनंचाऽन्त्यवर्गस्त्र्योघ्नोहतंन्यसेत् ३२
एकस्थलाऽन्तरेदक्षेत्वादिवर्गाऽन्त्ययोर्वधं त्र्यौहतंत
न्न्यसेद्दक्षे रूपदेशाऽन्तरेतथा ३३ स्थानेत्वादिघनं
दक्षेचैकदेशाऽन्तरेन्यसेत् तद्यथास्थानसंस्थानां-
योगंतत्रघनंभवेत् ३४ इत्थमेवत्रिदेशादिराशीनां
जायतेघनम् त्रिचतुःपूर्वराश्यादावऽन्यंतद्वासकान्त्य-
रेत् ३५ घनोदाहरणम् एकादीनांनवान्तानांतथा
नवघनस्यतथापंचाब्धिशानांघनान्वद न्यासः १।२
३।४।५।६।७।८।९।७२९।२७४५ एषांक्रमे-
णजाताः घनाः १।८।२७।६४।१२५।२१६।३४३

५१२।७२९।३८७४२०४८९।२०६८३६४३६२५

अथद्वितीयप्रकारेणनवघन घनपर्वकाः ३७३२४८ १३५५६८ १७४९६ ७२९

एषांयोगंनवघन ७२९ घनं ३८७४२०४८९.

अथवर्गमूलक्रमः

त्यक्त्वाऽन्त्योजात्कृतिं (वर्ग) द्विघ्नेमूलेनाप्तंसमं फलम् मूल पंक्तौलिखेत्लब्धवर्गमांद्योजतस्त्यजेत् ३६ स्यान्मूलंच पुनर्द्विघ्नेमूलेनाप्तंसमंत्विति उदाहरणम्– पूर्ववर्गाणां मूलार्थंन्यासः ८१।१६९।१५८४०४।१०००२१००-११०२५ क्रमेणलब्धानिमूलानि ९।१३।३९८।१०-००१०५.

अथघनमूलक्रमः

प्राग्घनं (आदि) ऽघनेचैवं हित्वाचाऽन्त्य घनाद्घनम् ३७पृ-थक् मूलेनस्वघ्नेन त्रिघ्नेनाद्यंवि भाजितम् लब्धंप्र-न्त्यांन्यसेत्लब्धवर्गंत्र्यन्त्याहतंत्यजेत् ३८ भाजिताद्या च्चतस्त्राद्याद्घनाद्धित्वाघनंपदं (घनमूलंस्यात्) स्यात्पुनश्च पृथङ्मूल वर्गैत्रिगुणेभाजितम् ३९ आद्यंलब्धफलंमूलपङ्क्तौ प्राग्वल्लिखेदिति उदाहरणम्-पूर्वघनानांमूलार्थंन्यासः

१।८।२७।६४।१२५।२१६।३४३।५१२।७२९।
३८७४२०४८९।२०६८३६४३६२५ क्रमेणल-
ब्धानिसूलानि १।२।३।४।५।६।७।८।९।७२९
।३७४५. अथभिन्नपरिकर्माष्टकम्
तत्रादौभिन्नयोगान्तरविधिः अह्वारेस्थापयेदेकंहा-
रंतद्भिन्नकर्माणि ४० भिन्नयोगान्तरेन्योन्यंराशी-
नामुभयोस्तथा हारांशौ भाजकेन घ्नौस्वस्वहारांश
कंविना ४१ तुल्यछेदाःसमछेदौस्युःस्यातांसम्भवे-
सति अपवर्तितैरपवर्तिताभ्यांवाहारैश्छिद्याच्चमर्दितौ
४२ स्वांशंहारंविनाहारभागावेवपरस्परम् वाबहूनां
द्वयोस्तुल्यहारास्तत्स्यहाराविति ४३ तुल्यहारांशका
नांतुतुल्यहारांशयोस्तथा संयोगंवान्तरंकृत्वाहारा
संततफलंभवेत् ४४ तुल्यछेदविधौहारघातंस्वस्व-
हरोद्धृतम् स्वांशघ्नंस्वस्व भागंतुपरहारघ्नवद्भवेत्
४५ तत्रैक्यंवान्तरंहारघातासंततफलंभवेत् उदा-
हरणम्- पंचांशत्र्यंशयुग्मामंतथापादार्द्धोन्तरंवद

न्यासः $\frac{१}{५}$ $\frac{१}{३}$ $\frac{३}{१}$ अहारराशावेकंहारंदत्वा न्यासः $\frac{१}{५}$ $\frac{१}{३}$ $\frac{३}{१}$ उक्तवत्करणाज्ज्ञाताः समछेदाः $\frac{३}{१५}$ $\frac{५}{१५}$ $\frac{४५}{१५}$ एषांयोगेजातं $\frac{५३}{१५}$ हरभक्तेजातम् $\frac{३८}{१५}$ न्यासः $\frac{१}{४}$ $\frac{१}{२}$ अनयोरन्तरेजातं $\frac{१}{४}$.

अथभिन्नगुणनविधिः

छिद्यातासंचांशावधंस्याद्भिन्नगुणने फलम् ४६ उदाहरणम्– सत्र्यंशो नैकेनाहतं सार्द्धदलेन ध्रंशारंवद न्यासः $\frac{११}{३}$ १$\frac{१}{२}$ सवर्णितेन्यासः $\frac{४}{३}$ $\frac{३}{२}$ गुणितेजातं $\frac{१२}{६}$ हरभक्तेजातं २. न्यासः $\frac{१}{२}$ $\frac{५}{१}$ गुणितेजातं $\frac{५}{२}$ हरभक्तेलब्धं २$\frac{१}{२}$.

अथभिन्नभागहारविधिः

परिवर्त्त्यांशकंहारं हारस्याधोवधोद्धृतम् ऊर्ध्वघातंफलंभिन्नेभागहारविधौभवेत् ४७ उदाहरणं– सत्र्यंशौकोद्धृतंयुग्मंतथाखाब्धिपादांशकमर्द्धोद्धृतंवद. न्यासः $\frac{४}{३}$ $\frac{२}{१}$ भाज्यः $\frac{२}{१}$ भाजकः $\frac{४}{३}$ भजनाल्लब्धोलब्धिः $\frac{३}{२}$ न्यासः भाज्यः $\frac{२०}{४}$ भाजकः $\frac{१}{२}$ भजनाल्लब्धं

$\frac{१०}{१}$ अथभागांशांशविधिः

छिद्धातासंचांशवधसंशांशांशफलं भवेत् उदाहरण-
म्–निष्कस्यार्द्धस्यव्यंशस्ययुग्मपादांशकोवदस्वा-
ष्टात्नांषोडशांशंचत्वेकस्यार्द्धीकृतंवद न्यासः $\frac{१}{१}$ $\frac{१}{२}$ $\frac{१}{३}$
$\frac{३}{४}$ उक्तवज्जातं $\frac{१}{९२}$ न्यासः $\frac{६०}{९६}$ $\frac{१}{२}$ सवर्णितेजातं $\frac{१६०}{१६}$
हरभक्तेजातं १० अथभिन्नवर्गादिविधिः
वर्नेवर्गेघनेघनोबर्गेपदे प्राग्वद्रांशयोः ४८ उदाहर-
णम्–सत्र्यंशैकस्यवर्गंतत्पदंतद्घनंतन्मूलंब्रूहिन्या-
सः $\frac{४}{३}$ वर्गः $\frac{१६}{९}$ मूलं $\frac{४}{३}$ अस्यघनं $\frac{६४}{२७}$ तन्मूलं $\frac{४}{३}$
अथस्वभागानुबंधस्वांशापवाहयोर्विधिरुच्यते.
स्वांशाढ्योनेलधःस्थेनहारंहन्यादुरेणच स्वांशाढ्यो
नेनतेनांशान्हन्यात्तस्यात्सवर्णितः ४९ उदाहरणं-
अंघ्रिर्निजार्द्दसंयुक्तस्तत्रस्वत्रिलवान्वितोच्यतां यु
ग्मपंचांशोनिजाष्टमांशोनोततः स्वचतुर्भिः सप्तमां-
शैर्हीनोवद अर्द्धंनिजाक्षाष्टांशयुक्तंतन्निजांघ्रिही-
न मुच्यताम् न्यासः [illegible] सवर्णिना जातः

$\frac{६}{१२}$ $\frac{३१}{१४०}$ $\frac{३९}{६४}$ अथापरोदाहरणम् एकस्यरुद्रां-
शकेनोनेनैकचतुः षष्ठ्यंशकेननिजे नहीनंससति
मुच्यतांन्यासः $\frac{७०}{१}$ यथोचितकरणायन्यासः
$\frac{६४}{१}$ $\frac{०१}{११}$ यथो- $\frac{०१}{६४}$ $\frac{०१}{११}$ चितंन्यासः $\frac{७०}{१}$ उक्तवत्स-
वर्णितेजातम् $\frac{४८४४०}{७०३}$ अथान्यदु- $\frac{०११}{७०३}$ दाहरणं-
निजसार्द्धतृतीयांशोनखांकंवद न्यासः $\frac{९०}{१}$
यथोचितंन्यासः $\frac{९०}{१}$ उक्तवत्सवर्णितंजातं $\frac{०१}{३}$ $\frac{१}{२}$
$\frac{१५}{१}$ अन्यदुदा $\frac{०५}{६}$ हरणम् निजसार्द्धतृतीयांशो-
नयुग्माब्धेनहीनंखांकंवद न्यासः $\frac{९०}{१}$ $\frac{३}{६}$ यत्रात्र
युग्मंहीनं पृथक्स्थाप्यउक्तवत्स $\frac{०१}{३}$ $\frac{१}{२}$ वर्णितं
जातं $\frac{१५}{१}$ हरभक्ताल्लब्धम् १५ युग्मंपृथक्स्थापि-
तंहित्वाजातम् १३

अथशून्यपरिकर्म्माष्टकम्

खढ्यंखोनंसमंखस्यवर्गादौखंखभाजितः राशिः
शून्यहरोज्ञेयोखघ्नःखंजायतेथवा ५० शून्यहा-
रेखनिघ्नश्चचिंत्यंशेषविधाविति यत्रनास्तिहरंत-

त्रज्ञेयंशून्यहरंबुधैः ५१ तत्रैवविन्यसेदेकंछेदं शू-
न्यहरस्थले एवमेवगुणाभावेशून्यंगुणकमुच्यते
५२ तत्रशून्यगुणस्थानेगुणमेकंतुविन्यसेत् उदा-
हरणम्— रूपहीनंचरूपाढ्यंखंखवर्गंचतत्पदम्
घनंघनपदंखस्यखघ्नः पंचोन्मितंवद पक्षंखेनो-
द्धृतंब्रूहिखघ्नः स्वार्द्धसमन्वितः पक्षघ्नंखहृतंत
र्कंजातंकस्तत्समुच्यताम् न्यासः ० एतदेकहीनं
जातम् १।० एकयुतंजातं १ खस्यवर्गः० मूलं०
घनं०तन्मूलं०न्यासः ५एतेखेनगुणिताःजाताः ० न्यासः
२ एतौखभक्तौ $\frac{२}{०}$ यदज्ञातोराशिस्तस्यगुणः०
स्वार्द्धक्षेपः $\frac{१}{२}$ गुणकः २ हारंशून्यं० हरयम् ६
ततोवक्ष्यमाणेनविलोमविधिना इष्टकर्म्मणावा-
लब्धोराशिः २ इतिशून्यपरिकर्माष्टकम् .

अथव्यस्तविधिरुच्यते.

गुणभाजकयोर्वर्गमूलयोस्स्वर्णयोर्मिथः ५३ व्य-
स्तंकृत्वाहितदृश्येप्राग्राशिर्जायतेखलु स्वांशा-

ढ्योनेतुभागाढ्योनोहरस्तु हरो भवेत् ५४ भागस्त्व
विकृतः कार्य्यव्यस्तेतच्छेषं मुक्तवत् उदाहरणम्-य-
स्त्रिघ्नोनिजयुग्मचरणान्वितस्त्रिभक्तः तत्त्वार्द्धोन
स्तस्य वर्गस्तान्नियुक्तस्तत्पदं द्विभक्तंलब्धमेकंचेत्य-
थमवद् न्यासः गुणः ३ क्षेपः $\frac{३}{४}$ भाजकः ३ ऋणं
$\frac{१}{२}$ वर्गं धनं ३ मूलं हरः २ दृश्यम् १ व्यस्तेनयथोक्त
करणेन प्राप्तारिशर्जातम् $\frac{४}{३}$

अथधनर्णपरिकर्माष्टकम्

तत्रोर्ध्वबिन्दुनाऋणचिह्नंज्ञेयम् ऋणयोर्धनयोर्यो
गंयोगेस्याद्विवरेन्तरम् ५५ धनर्णयोश्चविश्लेषेयो-
गंयोगेन्तरम्भवेत् ऋणयोर्धनयोर्घातं धनंस्याद्भज-
नंधनम् ५६ स्यादृणंस्वर्णयोर्घातंस्वर्णयोर्भजनं
क्षयम् उदाहरणम्- युग्मतर्कयोर्धनयोस्तथाऋ-
णयोर्योगंचान्तरं घातं घाताद्गुणभक्तात्फलंवद
न्यासः २।६ योगं ८ अन्तरं ४ बधं १२ गुणभ-
क्ताल्लब्धं ६।२ न्यासः $\dot{२}$।$\dot{६}$ योगं $\dot{८}$ अन्तरं $\dot{४}$ वधं

१२ गुणभक्ताल्लब्धं $\frac{1}{६}$। $\frac{1}{2}$ न्यासः $\frac{1}{2}$। $\frac{1}{६}$ योगः ४
अन्तरं $\frac{०}{}$ वधं $\frac{1}{१२}$ गुणभक्काल्लब्धं ६। $\frac{1}{2}$ न्यासः
२। $\frac{1}{६}$ योगं $\frac{१}{४}$ अन्तरं $\frac{१}{८}$ वधं $\frac{1}{१२}$ गुणभक्ताल्लब्धं
$\frac{1}{६}$। २

अथस्वर्णवर्गविधिः

स्वंवर्गस्वर्णयोःस्वस्वमूलेस्वर्णेयथोचिते ५७ मूलंनास्तित्ववर्गत्वाद्दणवर्गस्यतस्यच उदाहरणं-
धनस्यरूपद्वयस्यतथाऽऋणस्यरूपद्वयस्यवर्गं-
ब्रूहि ह्वयोरूपोत्रगीतः न्यासः रूपं २ रूपं $\overset{\circ}{२}$ जातौवर्गौरूपवर्गः ४ रूपवर्गः ४ मूलेरूप २ रूप $\overset{\circ}{२}$
ऋणवर्गः ९ तन्मूलं०

अथस्वर्णशून्ययोगान्तरविधिः

स्वदवेखोनेससंस्वर्णंखाद्वंव्यस्तमीरितम् ५८
उदाहरणार्थम् - न्यासः रूपं २ रूपं $\overset{\circ}{२}$ रूपं० योगमन्तरंचाविकृतं रू २ रू $\overset{\circ}{२}$ रू ० एतानिखाद्
वानिजातानि रूपं $\overset{\circ}{२}$ रू २ रू ०

अथखण्डवर्गविधिः

स्यात्खण्डयोर्वधाद्द्विघ्नंखण्डवर्गैक्यंयुक्छ्रुतिः उदाहर-
णम्- षड्विहीनयुगानांचवर्गंब्रूहि विचक्षण न्यासः
४।६ जातोवर्गः १६ खण्ड ४।६ योर्वधं २४ द्विघ्नंजा-
तंशेषं ४८ रूपं ३६ सर्वयोगाङ्कानां १० वर्ग १००स-
संभवतिवर्गः १६ शेषं ४८ रू ३६ आगतमूलयो ४।
६ वधं २४ द्विघ्नंशेषाद्वित्वामूलंस्यादेवंमूलं ४।६

अथेष्टकर्मविधिरुच्यते

तत्प्रश्नविधितुल्येष्टराशिः क्षुण्णोहृतोथवा ५९ रा
श्यंशैर्वायुतोहीनोदृष्टघ्नेष्टमनेनतु भक्तंस्यात्पू-
र्वराशिश्चेद्दौपक्षौयत्रतत्तु ६० इत्यंहारान्तरेणा-
समिष्टघ्नदृश्ययोस्तथा विश्लेषमेकमानंस्यात्तस्मा
द्वेयोनुपाततः ६१ उदाहरणम्- वेदघ्नः स्वत्रिभा-
गोनो भूपभक्तः समन्वितः राशेरर्द्धाब्धिषड्भागैः को
राशिर्विन्ध्यसम्मितः न्यासः गुणः ४ स्वत्रिभागही-
नः $\frac{१}{३}$ हरः १६ राश्यंशाः $\frac{१}{२}$ $\frac{१}{४}$ $\frac{१}{६}$ दृश्यं १३ क-
ल्पितमिष्टं ३ वेदघ्नः १२ स्वत्रि भागहीनः जातम् ८

भूपभक्तः $\frac{१}{२}$ कल्पितेष्टराशेरर्द्धाब्धितकांशौः $\frac{३}{२}$ $\frac{३}{४}$ $\frac{३}{६}$ युतोहरोजातः $\frac{१३}{४}$ इष्ट ३ घ्नदृश्य ३९ मनेना $\frac{१३}{४}$ संप्राप्नाशिः १२ अथद्वितीयोदाहरणम्- पुंजार्द्ध स्वत्र्यंशाद्यंवनभेदे गतं षष्ठंनिजसप्तांशाढ्यंनद्यांत-त्राष्टांशः स्वनवांशाढ्यस्थितः स्वेयाताः वेदहंसाश्चे-त्युञ्जेसर्वान् हंसान्वद न्यासः $\frac{१}{२}$ $\frac{१}{६}$ $\frac{१}{८}$ दृश्यं ४अङ्क-मेणसवर्णनं द्वाभ्यामपवर्त्ति- $\frac{१}{३}$ $\frac{१}{७}$ $\frac{१}{९}$ तं $\frac{३}{३}$ $\frac{४}{२१}$ $\frac{५}{३६}$ एषांयो गः $\frac{२५१}{२५२}$ इदंकल्पितैके १ष्टादूनंकृत्वाशेषं $\frac{१}{२५२}$ अनेनासंकल्पितैके १ष्टघ्नदृश्यं ४ जाताराशौहंस-संख्या १००८ तृतीयोदाहरणं-राशेस्त्र्यंशाक्षांश षष्ठान्पृथक्तान् दत्वाशेषंगोमितंब्रूहि राशिम् न्यासः $\frac{१}{३}$ $\frac{१}{५}$ $\frac{१}{६}$ दृश्यं ९ उक्तवत्करणाज्ज्ञातोराशिः३०

अथेष्टकर्म्मणिशेषजातिविधिः

छिद्दृश्यघातमंशोनछिद्घातासंफलम्भवेत् शेषजा-तिविधौसिद्धिर्व्यस्तेनेष्टकर्म्मणा ६२ उदाहरणं-स्वार्द्धदेवालयेशेषाद्युग्मत्र्यंशोगुरोर्गृहे शेषस्या-

ईग्रहेदत्वाशिष्टंयुग्मोरविलंवद् न्यासः $\frac{1}{2}\ \frac{2}{3}\ \frac{1}{2}$ दृश्यं २ यथोक्त करणेनजातंसर्वधनं २४ अथवातदेवन्यासः $\frac{1}{2}\ \frac{2}{3}\ \frac{1}{2}$ दृश्यं २ अत्ररूप १ मिष्टराशिंप्रकल्प्य भागापवाद विधिना स्वांशाढ्येनेत्वधस्थेनहारंहन्याद्दरेण चेत्यादिनासवर्णितेजातं $\frac{1}{12}$ अनेन इष्टा १ हतं दृष्टं २ भक्तं जातंसर्व धनं २४ अथविलोमविधिनान्यासः $\frac{2}{1}\ \frac{1}{2}\ 2\ \frac{3}{1}\ \frac{1}{2}$ स्वांशहीनेन्यासः $\frac{2}{1}\ \frac{1}{1}\ \frac{2}{1}\ \frac{1}{1}$ अथभागानुबंधेनजातं सर्वधनं २४ अथे- ष्टकर्म्मणिविश्लेषजात्युदाहरणम् पंचांशा- ऽयंशौतयोरन्तरान्वशेषः पृथक्पृथग्दत्वारूपशेषं १ चेद्राशिंवद् न्यासः $\frac{1}{5}\ \frac{1}{3}\ \frac{2}{5}$ दृश्यं १ जातोराशिः १५ सर्वेतेव्यस्तेनापिसिद्ध्यन्ति अथद्विपक्षजात्युदाहरणं त्रिशेषमेकस्य धनं षडश्वाः दशाश्वास्त्वपरस्य तुल्यमौल्या ऋणं तथाशेषं शरंतथाचतस्यतौतुल्यधनौचेदेकाश्वमौल्यंवद यदाद्यधनस्यशरांशमन्यधनं धनंशेषंऋणंतथात्राहि अत्राश्वमौल्यमज्ञातंतस्यमानं कल्पितमिष्टं ३ अनुपातेनचेदेका

श्वस्येदं ३ मौल्यं ३ तदाषण्णांमौल्यं १८ एवंदशाम्रानां मौल्यं ३० कल्पितेष्ट ३ घ्नौ दृश्यौच ९।१५ शोधनार्थं न्यासः $\begin{vmatrix} १८ & दृश्य & ९ \\ ३० & दृश्य & १५ \end{vmatrix}$ यावत् १८ तावत् ३० रूपं ९ रूपं १५ यथात्रानयो १८।३० रन्तरेण १२ संदृश्ययो ९।१५ रन्तरं २४ लब्धमेकाश्वस्यमौल्यं २ पुनरनुपाते- नषण्णांमौल्यं १२ शेषा ३ ढ्यमाद्यस्यधनं १५ एवंदशा- नांमौल्यं २० शेषर्ण ५ युतं १५ जातमन्यधनंच १५ अ- थान्यन्यासः $\begin{vmatrix} १८ & दृश्यं & ९ \\ ३० & दृश्यं & ० \end{vmatrix}$ अत्राप्यनयोरन्तरेण $\frac{१३२}{५}$ संदृश्ययो $\frac{९}{५}$ $\frac{१}{९}$ रन्तरं $\frac{२६४}{५}$ ल- ब्धमेकाश्वस्यमानं २ प्राग्वत्तयोर्धने १५।३ अथवा- आद्यधनादन्यंत्रिगुणंतछेषस्वंतत्वं २५ चेत्तयोर्धने वद अत्राद्यधनादन्यधनंत्रिगुणोक्तस्तर्हि आद्यंत्रि- गुणीकृत्य कल्पितेष्टवशान्न्यासः $\begin{vmatrix} ५४ & दृश्य & ३७ \\ ३० & दृश्य & ७५ \end{vmatrix}$ प- क्षयो ५४।३० रन्तरेण २४ संदृश्ययो २७७५ र- न्तरं ४८ लब्धमेकाश्वस्यमौल्यं २ तथाषण्णांमौल्यं१२ शेष ३ युतं १५ जातं प्रथमधनं १५ एवं द्वितीयधनं ४५

अथान्यदुदाहरणं एकनरस्यरत्नानि माणिक्यानिपंचा-
नि ५ नीलान्यष्टौ ८ मौक्तिकानिसप्तमितानि ७ रत्नमानी
तशेषंधनंखांकमितं ९० अन्यनरस्यरत्नानिसप्तमाणि
क्यानि ७ नवनीलानि ९ षण्मौक्तिकानि ६ रत्नमानीत
शेषंधनं द्विषष्टि ६२ मितं तौतुल्यस्वौचेद्रत्नमौल्यान्व-
द कल्पितमिष्टं ३ कल्पितंइष्टं २ कल्पितं १ अनुपातेन-
पक्षौन्यासः [१५।१६।७] अत्राद्यौ
क्यं ३८ परै- [२१।१८।६] क्य ४५

मा	नी	मौ		
१५	१६	७	द्व्यं	९०
२१	१८	६	द्व्यं	६२

योरन्तरेण ७ संकल्पितेष्ट १ घ्रद्द्वययोरन्तरं [९०।६२] २८ ल-
ब्धमेकस्य[२] मौल्यं ४ चेदेकस्येष्ट १ स्येदं ४ एषां ३ लब्धं
मौल्यं १२ पुनरेकस्य[१] माणिक्यस्येदं १२ चेत्पंच[५] माणि-
क्यानां मौल्यं ६० एवं प्रथमपक्षेमौल्यानि [मा नी मौ] ६०।६४।२८
शेषाद्यमेषांयोगं २४२ आद्यस्यसर्वधनं २४२ एवम-
न्यस्यापि यथा १ एकमाणिक्यस्येदं १२ चेत्सप्त[७] माणि
क्यानां मौल्यं ८४ एवंद्वितीयपक्षेमौल्यानि [मा नी] ८४।७२।
[मौ] २४ एषामैक्यं १८० शेष ६२ युतं २४२ जातं द्वितीय

धनंच २४२ एवमिष्टवशाद्बहुधा समधनंभवति अ-
थान्यदुदाहरणं एकोवदतिदेहि[१००]शतंत्व ह्मद्व्यान्मेद्वि[२]घ्नो-
भवति अपरोपिच दशांमांदेहित्व ह्मद्व्यान्मेषड्गु[६]णो भ-
वतितयोर्धनेवद अत्राद्यापरयोः कल्पितेष्टे धने न्यासः

२	६	१००
१	६	१००

अनयोः परस्य[१००]शते गृहीते आद्योद्वि[२]गुणि-
तः स्यादित्येका[२]लापो घटते अथाद्याद्द[१०]शापनीय द[१०]श-
भिः परधनंयुतंषड्[६]गुणंस्यादिति आद्यं षड्[६]गुणी कृत्यन्या-
सः

१२	६	६६०
१	६	११०

अतः प्राग्वल्लब्धमेक १ स्यमानं ७०
[७०] [द्विघ्नं १४०] [१००]
एकेन यं ७० चेद्द्वाभ्यां १४० इदं सहस्रयं शेषमादि धनं
[३० षड्गुणं १८० ऋणं ३० इत्ययुतं १७०]
४० एवमन्यधनं १७०

अथ धनर्णैक जातिराशीनामन्तरकर्म

स्वर्णानामेक जातीनां भेदे लघ्वधिकाल्लघुं हित्वातदधि
कंशेषयुक्तंस्वोर्द्धस्यजे दिति ६३ यथारवि तिथिश्च
तिपिण्डाना १२।१५ ।२२।२८ मन्तराच्छेषमग्नि ३
मितं भवति.

अथसंक्रमण विधिः

योगंतु ह्यन्तरेणोनयुक्तं कृत्वाततोर्द्धितौ स्यातामस्या

धिकौराशीतौतत्संक्रमणं भवेत् ६४ उदाहरणं ययो-
र्योगिंनखवेदमन्तरंतौराशीवद न्यासः योगं २० अंतरं
४ राशी १२।८

अथ विषम कर्म विधिः

राश्योर्घातेयुगघ्नेचराश्योर्योगकृतेस्तयोः कृत्वाभेदं भवे-
द्राश्योरन्तरस्यकृतिस्तयोः ६५ राश्योर्वर्गयुतौकृत्वा
राश्योर्योगकृतेस्तया भेदंराश्योस्तयोर्ज्ञेयंद्विघ्नघातस-
मंखलु ६६ वर्गान्तरंभवेद्राश्योस्तयोर्योगान्तराहतिः
घातेद्विघ्नेतयोर्भेदवर्गयुक्तातयोस्तथा ६७ राश्योर्व-
र्गयुतिस्तत्तु विज्ञेयागणकोत्तमैः अन्तरेणोद्धृतवर्गभे-
दंयोगमुदीरितम् ६८ राश्योर्योगकृतौराश्योर्घातंवे-
दाहतंबुधैः हित्वाचान्तरवर्गःस्याद्वर्गैक्यमुतिवर्गयोः
६९ विश्लेषस्यदलंराश्योर्घातमुक्तंविचक्षणैः उदा
हरणं भुजाभ्यूनात्पदंव्येकंकोटिकर्णान्तरंयदि य-
त्रतत्र भुजंकोटिंकर्णंब्रूहिविचक्षण अत्रकोटिक-
र्णान्तरमिष्टं २ अतोभ्यस्ताद्बाहुः १२ इष्टं २ सैकं ३

वर्गः ९ त्रियुतः १२ वर्गः १४४ अयंकोटिकर्णवर्गा-
न्तरं १४४ तयोर्योगान्तरघातसमं १४४ इष्टः २ को-
टिकर्णान्तरेण २ भक्तभयं १४४ जातं ७२ अयंयोगः
७२ अन्तरेण २ ऊनयुक्ते अर्द्धिते जातौ कोटिकर्णौ ३५।
३७ इष्टवशाद्बहुधा भुजकोटिकर्णाः स्युः अथापरो-
दाहरणं खाब्धिदोः कोटिकर्णैक्यंकोटिबाहुवधंतथा
खार्कयत्रभुजंकोटिंकर्णंतत्रोच्यतांखलु अत्रभुज-
कोटिवधो १२० द्विघ्नः २४० तद्युतिवर्गस्यवर्गयोगस्य
चान्तरं २४० यद्भुजकोट्योर्वर्गयोगः सखकर्णवर्गः
अतोदोः कोटियुतिवर्गस्य कर्णवर्गस्यचान्तरमिदं २४०
योगान्तर घातसमं २४० अतइदमन्तरं २४० योगेना
४० संलब्धं ६ दोः कोटियुतिकर्णान्तरं ६ अनेन युक्तो-
नेऽर्द्धिते योगेजाते दोः कोटियोगकर्णौ २३। १७ दोःको-
टियोगः २३ कर्णः १७ दोःकोटियुति २३ वर्गे ५२९
चतुर्गुणघातोने ४८० शेषंदोः कोट्यंतरवर्गः ४९
मूलं ७ इदंकोटिभुजान्तरं ७ भुजकोटियोगे २३ यु-

युक्तौनार्द्धे कृत्वाजाते भुजकोटी १५।८ भुजः १५ कोटिः ८

अथकिंचिद्वर्गकर्म

इष्टवर्गगजैर्निघ्नंव्येकार्द्धमिष्टभाजितं ७० एकः स्या-
त्तत्कृतेरर्द्धं सैकंराशिःपरोभवेत् वर्गयोगान्तरेव्येके रा-
श्यो स्यातांकृतीतयोः ७१ उदाहरणं वर्गयोगान्तरे
व्येके मूलदेतौययोर्वद कल्पितमिष्टं $\frac{१}{२}$ अस्यकृतिः
$\frac{१}{४}$ अष्टगुणोजातः २ अयंव्येकः १ दलितः $\frac{१}{२}$ इष्टेन
हृतः जातः प्रथमोराशिः १ अस्यकृतिः १ दलिता $\frac{१}{२}$
सैका $\frac{३}{२}$ अयमपरोराशिः $\frac{३}{२}$ एवमेतौराशी | $\frac{१}{१}$ $\frac{३}{२}$ | ए-
वमेकेनेष्टेनजातौ $\frac{७}{२}$ $\frac{१७}{८}$ द्विकेनेष्टेन $\frac{३१}{८}$ $\frac{९९३}{३२}$

अथ मूलगुणविधिः

गुणघ्नपदयुक्तोनराशेरर्द्धगुणस्यच वर्गेणयुक्तद्दष्ट
स्यमूलमर्द्धगुणेनहि ७२ ऊनंवाढ्यंततोवर्गं प्राग्राशि-
र्जायतेखलु चेदंशोरूनयुक्तः स्यादंशोरूनयुतेनच ७३
एकेनगुणकं दृश्यं भक्त्वाताभ्यांततोन्तवत्. उदाहरणं
राशेः सप्तगुणमूलार्द्धेनाद्युःभशेषंचेद्राशिंवद न्यासः

मूलगुणः $\frac{७}{२}$ दृश्यं २ अर्द्धगुणस्यवर्गेण $\frac{४९}{१६}$ युक्तस्य दृष्टस्य $\frac{८१}{१६}$ मूलं $\frac{९}{४}$ अर्द्धगुणेन $\frac{७}{४}$ ऊनत्वादाढ्यं $\frac{१६}{४}$ वर्गीकृतंजातोराशिः १६ उदाहरणं त्रिगुणैर्निजमूलैर्युतः दिक्कोराशिर्भवति न्यासः गुणः ३ दृश्यं १० गुणा ३र्द्ध $\frac{३}{२}$ वर्गेण $\frac{९}{४}$ युक्तस्यदृ १० घ्नस्य $\frac{४९}{४}$ मूलं $\frac{७}{२}$ अर्द्धमूलगुणे $\frac{३}{२}$ युक्तत्वादूनं $\frac{४}{२}$ वर्ग ४ राशिः ४ उदाहरणं राशेर्मूलद्वयंदत्वा राशेरूप्यष्टांशकंपृथग्दत्वा शेषंयुग्मोन्मितं धनं चेत्सर्वस्वराशिंवद न्यासः गुणः२ त्रिगुणाष्टांशाः $\frac{३}{८}$ अथवाष्टमांशात्रयः $\frac{१}{८}$ $\frac{१}{८}$ $\frac{१}{८}$ दृश्यं२ एकोनां $\frac{३}{८}$ शेनाने $\frac{५}{८}$ नदृश्यं२ मूलगुणंच२भक्तादृश्यं $\frac{१६}{५}$ मूलगुणं $\frac{१६}{५}$ अर्द्धगुण $\frac{८}{५}$ वर्ग $\frac{६४}{२५}$ दृश्या $\frac{१६}{५}$ ढ्यंजातं $\frac{१४४}{२५}$ मूलं $\frac{१२}{५}$ गुणार्द्धेन $\frac{८}{५}$ ऊनत्वादाढ्यं ४ वर्गोराशिः १६ उदाहरणं द्रव्यस्यराशेः पादांशमूलंराशितर्काष्टमांशाद्यं दत्वाशेषंयुग्मंचेद्राशिंवद न्यासः गुणः $\frac{१}{४}$ अत्रराशेः पादांशमूलगुणं $\frac{१}{४}$ तर्हिदृश्य२ पादांशं $\frac{१}{२}$ दृश्यंज्ञेयं $\frac{१}{२}$ भागाः $\frac{६}{२}$

प्राग्वज्जातौ गुणद्वयौ १।२ गुणः १ द्वयः २ प्राग्व-ज्ज्ञातं राशिं चतुर्थांशं ४ एतच्चतुर्भिर्गुणितं जातो द्रव्य-राशिः १६ उदाहरणं त्रिभिः स्वमूलैर्युतं स्वपादाढ्यं चेद्रांजातं चेद्राशिं वद न्यासः भागः $\frac{1}{4}$ मूलगुणः ३ दृश्यं ११ अत्र एकेनां $\frac{1}{4}$ शेनाढ्येन $\frac{5}{4}$ मूलगुणं दृ-श्यं च भक्त्वा ताभ्यां प्राग्वज्ज्ञातो राशिः ४ .

अथ त्रैराशिकाद्योजराशिकविधिः

फलयोर्हारयोश्चापि ह्यन्योन्यं परिवर्त्तनं ७४ पक्षयो रुभयोः स्तल्पत्वल्पराशिवधोद्धृतम् बहुराशिवधं शेषं फलं स्याद्योजराशिके ७५ बहुराशिवधे स्वल्पराशि घातेन यैवच राशिमण्डलसंख्याया विज्ञानेनोच्यते-हरः ७६ राशिस्तत्रोच्यते राशेः फल एवाथ कथ्यते राशिर्वधविधौ हारः पक्षयोरुभयोरपि ७७ तत्रोज-राशिके ऽज्ञातस्थाने सर्वास्तितिं लिखेत् आदेः फलं यथांशाः स्यात्तथांशाः परपक्षजं ७८ यद्गुणांशाऽधि कं वा ऽल्पं स्यात्फलं पूर्वपक्षजं तद्गुणांशाऽधिकं वाऽल्पं

स्यात्तस्मात्परपक्षजं ७९ इच्छाद्युत्थफलौयत्रस्या-
तांतुल्यकुलेगतौ तत्रादि फलयोरेव परिवर्त्तनमाचरे-
त् ८० इच्छायाः प्रथमस्यापिसर्वत्रैककुलं भवेत् नी-
चवंशप्रमाणेननीचराशिहरंबुधैः ८१ हत्वातन्नी
चराशिस्तद्धुच्चजातिः प्रजायते आदिराशेः फलं
त्वन्यजातिर्मध्येस्थितंतयोः ८२ इच्छाहतंफलंवादि
भक्तमिच्छाफलंभवेत् एतत्त्रैराशिकंचादिनिघ्नमि
च्छोद्धृतंफलं ८३ इच्छातोत्थंफलंव्यस्तेज्ञेयंत्रैराशि
केखलु च्छेदंयत्रभवेत्तत्रज्ञेयंव्यस्तोजराशिकं ८४
यत्रेच्छावर्द्धनाल्लब्धेर्न्यूनत्वंजायतेथवा ह्रासवृद्धि
फलेज्ञेयंव्यस्तंत्र्याद्योजराशिकं ८५ प्रकारान्तरेण
वाद्यन्यपक्षयोस्तिर्य्यक् संस्थयोः परिवर्त्तनं केवलं फ-
लयोः कृत्वानपृथक्तत्रहारयोः ८६ अन्योन्यंतुततो
भक्तास्वल्पराशिवधेनहि अधिराश्याहतिंलब्धंतदि
च्छाफलमुच्यते ८७ त्रैराशिकोदाहरणं द्रम्मद्
येन सेटंलभ्यतेचेत्सार्द्धत्रयेणद्रम्मेणकिंलभ्यते त्र्याः

सः |२ ७/२ ; १ ३/२| फलपरिवर्त्यन्यासः |२ ३/२ ; ७/२ १| अत्रबहुराशि |१।७/२| वधं |७/२| लघुराशि|३/२।२| वधेन २ भक्तं लब्ध ७/४ हरभक्तं जातं पादोनद्वयसेटकं |१ ३/४| अथवा मिन्न्यासे राशित्रयं तस्मात्त्रैराशिके एवन्यासः |२।१।७/२| अत्र आदिः २ आदेः फलं १ इच्छा ७/२ इच्छाहतं फ१-लं ७/२ आदि भक्तं इच्छाफलं ७/४ प्रकारान्तरेण |२।१ ; ७/२।३/२| फलपरिवर्त्यन्यासः |२।३/२ ; ७/२।१| बहुराशि |७/२।१| वधं ७/२ स्वल्पराशि |२।३/२| वधेन २ भक्तं लब्धमिच्छा फलं ७/४ अथवान्यासः |२।१।७/२।३/२| फलं परिवर्त्य-न्यासः |२।३/२॥ ७/२।१| बहुराशि |७/२ १| वधं ७/२ ल-घुराशि |२।३/२| वधेन २ भक्त मिच्छाफलं ७/४ अथ वान्यासः |२/१ ७/२ ; १/१| हारं फलं परिवर्त्यन्यासः |२।७ ; २ १ ; १| बहुराशि |७।१।१।१| वधं ७ स्वल्प-राशि |२।२।३/२| वधेन ४ भक्तं जातं फलं ७/४ अत्र द्रम्म-द्वयस्य हारं १ एकसेटकस्य हारं चाप्येकः १ कल्पितः पुनस्त्रैराशिकोदाहरणम् वस्त्रद्वयस्यमौल्यं निष्कंचे

त्रिनिष्कैः कत्यम्बराणिलभ्यंते न्यासः |२/१ ३/~| अ-
त्रेच्छाफलयोरेकजातित्वादाद्यंफलंपरिवर्त्त्यन्यासः
|१/२ ३/~| प्राग्वत्फलंपरिवर्त्त्यन्यासः |~ १/२ ३| उक्तव-
ल्लब्धम्वस्त्रमानं ६ पुनरपित्रैराशिकोदाहरणं ये-
जीवा अष्टसेटकमन्नं चतुर्भिर्दिनैर्भक्षन्तितेदशसे
टकमन्नंकत्युमितैर्दिनैर्भक्षंतिन्यासः |८/४ १०/~| उ-
क्तवल्लब्धाः दिवसाः ५ अथपुनरपित्रैराशिकोदाह-
रणंचतुर्थं सपादैकचत्वारिंशद्भिर्द्रम्मैरुक्थंगसेटक-
६३ ममलघृतमानीतं तत्सकपटंकृत्वातन्मध्येसक
पटैकसेटकस्यमोल्यंनवपणंजातंचेत् सर्वास्मिन्घृतेक
तकपटसेटान्तकादिन्वद् न्यासः द्रम्माः घृतमोल्यं-
|४१ १/४| घृतसेटकानि ६३ नवभिः पणैः सकपटमे-
कसेटकमितंघृतंलभ्यतेचेत् सर्वघृतस्यमोल्यपणैः
किमितिन्यासः |९/१ ६६०/~| लब्धंसकपटंसर्वघृतं
|७३ १/३| अस्मिन्पुनिष्कपटंघृतं ६३ हित्वाशेषंक
पटं |१० १/३| तत्कंकिंवातैलंदुग्धंदधिः किम्वापानीयं

किंवा कदलीफलम् अथवाऽयासान्नभक्तं वापरिपाचितपिण्डालुकादिकम् अथव्यस्तत्रैराशिकोदाहरणं वर्षत्रयस्यप्राणेमौल्यंतर्कचेन्नन्दाब्दस्यप्राणेमौल्यंवद न्यासः |३ ९ / ६ ~| प्राग्वद्गुराशिवधः १८ लघुराशि |~।९| वधः९ भक्तः लब्धंमौल्यं २ अथवान्यासः |३।६।९| अत्रादिः ३ फलम् ६ इच्छा ९ व्यस्तत्रैराशिकत्वादादि ३ हतं फलं ६।१८ इच्छा ९ भक्तं फलं मौल्यंजातं २ पुनर्व्यस्तत्रैराशिकोदाहरणं कस्मिन् विद्राशींत्रिभिर्भक्तातर्कफलंचेत् नवभिर्भक्तार्किस्फलंभवेत् न्यासः |३।९ / ६ ~| प्राग्वल्लब्धं २ पुनरपिव्यस्तत्रैराशिकोदाहरणम् यद्वस्तुद्वादशाजीवाः त्रिभिर्दिनैर्भक्षंतितद्वस्तुवेदोन्मिताः जीवाः कति दिवसैर्भक्षंति न्यासः |१२ ४ / ३ ~| फलं ३ हारं ४ च परिवर्त्यन्यासः |४ १२ / ~ ३| उक्तवत्करणाल्लब्धं ९ अथापरोदाहरणं यत्कर्म्म द्वादशानराख्रिभिर्दिनैः कुर्वन्तितंकर्म्म वेदोन्मिताः मनुष्याः कतिदिवसैः कुर्वन्ति न्यासः |१२ ४ / ३ ~|

प्राग्वत्फलं ९ अथपंचराशिकोदाहरणं मासेरवाक्षे न्तरंयुग्मवर्षेसेकिंतथान्तरंन्यासः| १ | १२ प्राग्वन्मिथः पक्षयोः फलं परिवर्त्यन्यासः - |५० | ५ / २ | ५०| |१ १२ / ५० ५ / ५० २| बहूनांराशीनां |१२|५|२| वधः १२० लघु- राशि |१|५०|५०| वधेना ५० प्तः लब्धंतथान्तरं |१२ / ५| अथप्रकारान्तरेणन्यासः |१|५०|२ / १२|५|५०| फलंपरिवर्त्यन्यासः |१|५०|५० / १२|५|२| बहूनांराशीनां १२|५|२ वधः १२० लघुराशि १|५०|५० वधेन ५० भक्तस्तदिच्छाफलम् |१२ / ५| वान्यासः |१|५०|२|| १२|५|५०| फलं परिवर्त्य न्यासः |१|५०|५०|| १२|५|२| बहूनां |१२|५|२| वधं १२० स्वल्पराशि |१|५०|५०| वधेन ५० भक्तं लब्धमिच्छाफलं |२ २/५| अथकालज्ञानार्थंन्यासः |१ ५० / ५० ५ / २ १२/५| फलंपरिवर्त्यन्यासः |१ ५० / ५० ५| बहूनांराशिनां |१|५०| १२/५ वधः |१२/५ २| १२० लघुराशि ५|२ वधेन १० भक्तः लब्धामासाः १२ अथमूलधनार्थंन्यासः |१ १२ / ५० ५० / २ १२/५| फलंपरिवर्त्यन्यासः |१ १२ / ५० ५० / १२/५ २| प्राग्वल्लब्धंमूलं-

धनं ५ अथव्यस्तपंचराशिकोदाहरणं वेदसेटकवस्तुषोडशाजीवा एकस्मिन्दिने भक्षंतिचेत्सेट द्वयवस्तुवस्त्रमिताः कत्युन्मितदिनैर्भक्षंतिन्यासः

४	२
१६	८
१	~

फलं हारंच परिवर्त्यन्यासः

४	२
८	१६
~	१

प्राग्वत्लब्धंदिनं १ पुनर्व्यस्तपंचराशिकोदाहरणं रसंव्यासंद्विलब्धंचेद्दशपंचोद्धृतंवद न्यासः

६	१०
३	५
२	~

फलंहारंपरिवर्त्यन्यासः

६	१०
५	३
~	२

उक्तवल्लब्धं २ अथपंचराशिकोदाहरणं दशजीवाः विंशद्दिनैश्चत्वारिंशन्मितंसेटमणंवावस्तुं भक्षंतिचेत्पंचोन्मिताः जीवास्तिथिभिर्दिनैः कतिमितवस्तं भक्षंति न्यासः

मेर ४० वासेर १६०० वामण ४०

१०	५
२०	१५
४०	~

फलं परिवर्त्यन्यासः

१०	५
२०	१५
~	४०

उक्तवल्लब्धं १५ अथसप्तराशिकोदाहरणं विस्तारे त्रिकरैस्तल्याः दैर्घ्येवेदोन्मिताः करैः येवस्त्राः भास्करास्तेषांमौल्यंरवाज्योन्मितं यदि विस्तारे षण्मिताः हस्तैः दैर्घ्येनागोन्मिताः करैः येवस्त्राः षण्मिताः स्तेषाम्मौल्यंब्रूहि विचक्षण न्यासः

३	६
४	८
१२	६

उक्तवल्लब्धंमौल्यं २० अथवा विस्तारदैर्घ्य ३।४ घातं
१२ एक वस्त्रस्य क्षेत्रफलं १२ द्वादश १२ गुणितं १४४
द्वादशवस्त्राणां क्षेत्रफलं १४४ एवंपरपक्षेवस्त्राणां
क्षेत्रफलं २८८ ततस्त्रैराशिकेणयथास्य १४४ मौल्यं
१० चेत् २८८ मौल्यंकिमितिन्यासः | १४४ १० | २८८ |
लब्धं मौल्यं २० अथवा त्रैराशिकद्वयेन पंचराशीक-
फलं त्रैराशिकत्रयेणसप्तराशीकफलं त्रैराशिकचतु-
ष्केणनवराशिकफलं त्रैराशिकपंचकैरेकादशराशिक
फलं षड्भिस्त्रैराशिकैस्त्रयोदशराशिकफलमित्यादिकं
भवति अथनवराशीकोउदाहरणं या नीष्टिकानि-
विस्तारेत्वष्टभिश्चांगुलैस्समा दैर्घ्येसूर्यांगुलैस्तुल्या
वेधेवेदांगुलैस्तथा द्रम्मैः षोडशभिस्तानिलभ्यन्तेचे
च्छतानिहि विस्तारेंगांगुलैस्तुल्यादैर्घ्येशक्रांगुलैस्तथा
वेधेपंचांगुलैस्तुल्याव्योमाब्धीनीष्टिकानिच द्रम्मैः क-
त्युन्मितैर्ब्रूहिलभ्यन्तेसत्वरंबुध न्यासः | ८ १२ ४ १०० १६ | ६ १४ ५ ४० | उ-
क्तवल्लब्धंमौल्यंद्रम्माः ७ अथैकाद- | शा

राशिकोदाहरणं विस्तारेष्टांगुलैर्दैर्घ्ये द्वादशैरंगुलैस्ससमाः वेधेवेदांगुलैस्तुल्यास्तौल्येसेट द्वयोन्मिताः द्रम्मैर्नागोन्मितैः पट्टालभ्यन्तेशून्यदिङ्मिताः एवंशक्रांगुलैर्दैर्घ्ये विस्तारेंगांगुलोन्मिताः वेधेपंचांगुलैस्तुल्यास्तौल्येसेटत्रयोन्मिताः पट्टाःखाब्धिमिता द्रम्मैर्लभ्यन्तेकियदुन्मितैः न्यासः

८	६
१२	१४
४	५
२	३
१००	४०
८	

लब्धंमौल्यंद्रम्माः ५ $\frac{१}{४}$ अथत्रयोदशराशिकोदाहरणं दैर्घ्येह्यर्कांगुलैस्तुल्याः विस्तारेष्टांगुलैस्ससमाः पिण्डेचाब्ध्यंगुलैस्तुल्यास्तौल्येसेटद्वयोन्मिताः येपट्टाःषष्टिभिस्तुल्यास्तेषामानयनायहि भाटकंषट्पणाश्चेत्तु यद्देशेक्रोशपंचके दैर्घ्येशक्रांगुलैस्तुल्या विस्तारेंगांगुलैस्तथा पिण्डेबाणांगुलैस्तुल्यास्तौल्येसेटत्रयोन्मिताः येपट्टाः खाब्धयस्तेषां भाटकं योजने कियत्. न्यासः

८	६
१२	१४
४	५
२	३
६०	४०
५	४
६	

लब्धाः भाटकेपणा ५ $\frac{१}{४}$ पणानांद्रम्मकरणरीतिः पणानांतुहरंभूपैर्हत्वा-स्युर्द्रम्मजातिगाः तेपणाएवमखिलाः

छि ह्रूमानाःस्युरुत्कुलाः ८८ अत्रव्यस्तसप्तराशिका
द्युदाहरणानिविस्तारभयान्नलिखितानि

अथ भाण्डप्रतिभाण्डकविधिः

मिथोवस्त्वर्जनेवस्तोः पक्षयोः परिवर्त्तनात् च्छेदयोः
फलयोर्व्यस्तेत्वव्यस्तेमौल्ययोरपि ८९ अत्यराशीव
धाप्तंस्याद्वहुराशिवधंफलं उदाहरणं द्रम्मेणाम्रा-
ष्टकंयत्रपणेनदाडिमद्वयंलभ्यन्ते केवलाम्रेणलभ-
न्तेकतिदाडिमाः न्यासः

१६	१
८	२
१	~

मौल्यंफलंपरिवर्त्त्य
न्यासः

१	१६
८	२
~	१

उक्तवल्लब्धानिदाडिमा-
नि ४ पुनरुदाहरणंव्यस्तं दिग्भिर्द्रम्मैः
षोडशाब्दस्यतुरगोलभ्यते खाश्विभिर्द्रम्मैर्वेदाश्वि-
वत्सरास्त्रीप्राप्नोतिचेत् वेदमिताब्देन तुरगेण कतिव
र्षमितास्त्रीप्राप्नोतितद्वद न्यासः

१०	२०
१६	२४
४	~

व्यस्त-
त्वात् केवलंपक्षयोः फलंपरिवर्त्त्य न्यासः

१०	२०
१६	२४
~	४

उक्तवत्करणात्फलं १२ वर्षास्त्री यथाव्य-
स्तत्रैराशिकेण ४ वर्षतुरगस्यमौल्यं ४०

त्रैराशिकेण २० द्रम्मैः २४ वत्सरास्त्री लभ्यते चेत् ४० द्रम्मैः कतिवत्सरास्त्री इति २०।२४ घातं ४८० द्रम्मं ४० भक्तं फलं १२ वर्षास्त्री.

अथमिश्रव्यवहारः

मानकालहतं मानं मिश्रकालाहतं फलं ९० मिश्रघ्ने तेन दैक्याप्ते स्यातां मूलकलान्तरे स्यादिष्टकर्म्म जं मूलं मिश्रेहित्वा कलान्तरं ९१ उदाहरणं पञ्चकेनशतेनब्दे मूलं स्वं सकलान्तरं षोडशं चेत्पृथक्ब्रूहि तत्र मूल कलान्तरे न्यासः

१	१२
१००	१६
५	

लब्धे क्रमान्मूल कलान्तरे १०।६ अथवा एकं १ मूलधन मिष्टं प्रकल्प्य १ तस्य वर्षेकलान्तरं जातं $\frac{३}{५}$ मूलधनैवेष्टाढ्यं जातं $\frac{८}{५}$ अनेनाप्तं इष्ट १ घ्न दृश्यं १६ लब्धं मूलधनं १० मिश्रा १६ दूनं फलं ६ कलान्तरं ६.

अथमिश्रान्तरविधिः

स्वल्पमानफलेनाप्तं बहुमानफलं फलं कृत्वैकेनाऽयुतं तेन भक्त्वाहीष्टकृतिं फलं ९२ अन्यमूलधनं ज्ञेय.

मिष्टवर्गाऽन्वितं फलं आद्यमूलधनंतुल्येकाले तुल्ये-
फलेययोः ९३ उदाहरणं पंचकशतेनदत्तं यत्फल
वर्गोनिं तद्द्वाकशतेनदत्तं तुल्यः कालः फलंचतयोः य-
थात्रबहुमितिफलं १० लघुमितिफलेनांसं २ एकोने-
ना १ मं इष्ट ४ वर्ग १६ लब्धमन्यस्य धनं १६ इदं १६
इष्ट ४ वर्ग १६ युतंजातं प्रथम धनं ३२ अतोजराशि
केएकालः मासाः ५/२ फलंच ४ द्विकेनेष्टेन २ अ-
न्यधनं ४ प्रथमधनं ८ कालः मासाः ५ फलंकला-
न्तरं २ उदाहरणं एककशतेन दत्तं यत्फल वर्गोनंत-
त्पंचकशतेन दत्तं तुल्यः कालः फलंचतयोः अत्रापि
लघु १ फलासंबहु ५ फलंलब्धं ५ अनेनैकोनेना ४
समिष्ट २ वर्ग ४ लब्धं १ द्वितीयधनं १ इदं १ इष्ट २
वर्गा ४ ढ्यं प्रथमधनं ५ समकालः मासाः ४० फलंच
२ एवमिष्टवशाद्बहुधा.

अथमिश्रान्तरविधिः

योगान्तरेविलोमेनस्यातांप्राग्वत्तयोर्धने उदाहरणम्

पंचकशतेनदत्तं यत्फलवर्गाढ्यंतद्दशकशतेनदत्तंतु-
न्यःकालः फलंचतयोः अत्रापिलघु ५ फलासंबहु १०
फलं २ अनेनैक १ युतेना ३ सं ३ इष्ट ३ वर्ग ९ लब्धं
न्यधनं ३ तदिष्ट ३ वर्ग ९ द्विघ्ना ६ प्रथमधनं ६ कालः
मासाः १० फलंच ३ इष्टवशाद्बहुधा स्युः तथामिश्रा
न्तरविधिः इष्टांत्यस्यसमूलस्य फलस्येष्टाहतेगुणे ९४
भेदेनान्तरमिष्ट घ्नद्दृश्यं मूलधनं भवेत् उदाहरणं पंचक
शतेनदत्तंमूलं सकलान्तरं गतेवर्षे द्विगुणंषोडशहीनंल-
ब्धंमूलंधनंवद न्यासः दृश्यं १६ गुणं २ अत्रमूलधनं
इष्टः ३ इष्ट ३ घ्नगुणं ६ दृश्यंच ४८ अतःपंचराशि

$\frac{1}{100}$	१२
५	३

केण लब्धमिष्टे ३ कलान्तरं $\frac{९}{५}$ एतन्मू-
लः धना ३ढ्यं $\frac{२४}{५}$ अस्यगुणे ६न्तरे-
ण $\frac{६}{५}$ संदृश्यं ४८ लब्धंमूलधनं ४० कलान्तरंच २४
अपरोदाहरणं पञ्चकशतेनदत्तंमूलंसकलान्तरम्
वेदाब्दैस्त्रिगुणंयुगाधिकं लब्धं मूलंसमाचक्ष्व अत्र
एके १ नइष्टेन प्राग्वच्चतुर्षुवर्षेषु कलान्तरं $\frac{१२}{५}$ मूला १

द्यं $\frac{१५०}{५}$ अस्येष्ट१घ्नगुणे ३ न्तरं $\frac{३}{५}$ तेनाप्तं $\frac{३}{५}$ संइष्ट१ घ्नहृद्यं ४ लब्धं मूलधनं १० कलान्तरंच २४

अथमिश्रांतरविधिः

स्वस्वमानहृताः स्वस्वकालाः स्वस्वफलोद्धृताः ९५ कालैः स्वस्वगतैराप्तास्तेमिश्रघ्नाः पृथक् पृथक् लब्धियोगोद्धृता युक्तखण्डा भिन्ना भवन्तिहि ९६ उदाहरणं एकपंचत्रिकशतैर्दत्तंखण्डैस्त्रिभिर्नरवं खण्डान् षट् द्व्यक्षमासेषुतुल्यमासं फलंवद न्यासः

१	६
१००	
१	

१	२
१००	
५	

१	५
१००	
३	

मिश्रधनं २० क्रमाज्जातानि खण्डानि १०।६।४ पंचराशिकेनतेषां समकलान्तरं $\frac{३}{५}$ $\frac{३}{५}$ $\frac{३}{५}$

अथ मिश्रान्तररीतिः स्युः फलानि पृथक् क्षेपाः मिश्रघ्नाः स्वैक्यभाजिताः उदाहरणं एकस्यत्रिमितं द्रव्यं द्वितीयस्याक्षभिर्मितं तृतीयस्यांगतुल्यंचेत्तदैक्यवणिजात्फलं युग्मवेदोन्मितंलब्धं तेषांलब्धिं पृथग्वद न्यासः क्षेपाः ३।५।६ मिश्रधनं ४२ जातानिधनानि ९। १५।१८ एतानिस्वस्वादि धनैरूनानि लाभाः ६।१०।१२

अथमिश्रान्तररीतिः यातक्षणफलानिस्युः क्षेपाःप्रा-
ग्वत्ततः क्रमात् ९७ उदाहरणं एकद्वित्रिषुमासेषु
गमाणांमासिकंफलं रामवेदोन्मितंबाणं प्राप्यतेक्रमशो-
यदा पंचषट् दशमासानांमध्येमिश्रं नृपोन्मितं प्राप्तंचे-
त्त्वरंतेषांलब्धिंब्रूहि पृथक्पृथक् न्यासः मिश्रं १६
क्षेपाः १५।१२। ५०/३ क्षेपयोगः १३१/३ मिश्र१६घ्नाः
क्षेपाः क्षेपयोगभक्ताः पृथक् फलाः क्रमेशः | ५ ६५/१३१ | ४ ५३/१३१ | ६ १४/१३१ |

अथमिश्रान्तरक्रमोच्यते

स्याच्चक्रपरिधेर्हस्तैर्भक्ता मार्गकराःफलं तच्चक्रभ्र-
मणस्यैवमानंज्ञेयंविचक्षणैः ९८ चक्राहतंचक्रफल
मिच्छाच्चक्रविभाजितं स्यात्तत्कांक्षाचक्रफलंतच्चक्र
भ्रमणंभवेत् ९९ उदाहरणं यच्चक्रपरिधिर्हस्तैर्द्वा-
दशैःसम्मितो भवेत् तच्चक्रभ्रमणाद्युक्तमार्गेषष्टिकरा
त्मके तच्चक्रभ्रमणस्यैवमानंकत्युन्मितंभवेत् तत्रष-
ट्करचक्रस्यमानंकिंभ्रमणंस्यद्धि न्यासः चक्रपरि-
धिः १२ मार्गः ६० चक्रभ्रमणमानंजातं ५ अथापर

चक्रपरिधिः ६ भ्रमणमानंजातं १०

अथयोगमिश्चविधिरुच्यते

यद्युवेगाद्धि नाद्यंस्याद्घटयाद्यं घटिकाजवात् मासाद्यं मासवेगाच्चवर्षाद्यंतज्जवाद्भवेत् १०० वेगभेदोद्धृतं भुक्तं भुक्तिभेदंफलं भवेत् तत्फलंयोगरूत्कालं विज्ञेयंवेगरूत्कुलं १०१ तेनघ्नौतुतयोर्वेगौस्वस्वयात समन्वितौ तुल्यौस्तस्तततस्तल्यौस्तस्ततः पूर्ववन्मुहुः १०२ रूत्वातौस्तःसमावेवंविश्लेषेरारीघ्नतोयदि मन्देल्पेयत्रपूर्वन्तुयद्यातादवंसमीरितं १०३ ततस्मिन्नतइतेह्नित्वातौतुल्यावेवकीर्त्तितौ तयोस्तविवरंस्वस्ववेगघ्नंफलदोद्धृतम् १०४ लब्धंप्राग्वत्तयोर्द्वास्यातांतौतुद्युतौसमौ द्वयोर्मार्गगयोः किंबाहृयोर्वक्रगयोर्भवेत् १०५ वेगैक्यं फलदंवेगभेदंताद्धि न्मयोर्भवेत् उदाहरणं यज्जीवएकस्मिन् दिने अष्टयुग्मोर्न्मितंक्रोशंगच्छतितेन भुक्तंमार्गक्रोशच्चतुर्दशकं योपरोज्जीवस्तदेकस्मिन्दिने द्वाविंशत्क्रोशमितं मार्गंगच्छति.

तेनभुक्तक्रोशद्वयमार्गे चेत्तयोर्योगकालंदिनात्तयात-
योस्तुल्यं भुक्तमार्गेचान्यक्ष्वन्यासः गतिः २८ भुक्तमा-
र्गे १४ अपरस्यगतिः ३२ भुक्तमार्गे २ गत्यन्तरं ४ अ-
न्तरं १२ लब्धं दिनानि ३ तुल्यं भुक्तंमार्गे ९८।९८ अ-
न्यन्यासः गतिः २८ भुक्तं २ गतिः ३२ भुक्तं १४ यातं
युतिकालं ३ तुल्यं भुक्तमार्गे ८२।८२ एवंग्रहयोर्गति
भ्यां ऐक्ययातयोगकालौ तुल्य भुक्तं लिप्ताभागादिकं
भवति अथमिश्रान्तरविधिः गाम्यागास्योर्जवैक्ये नभ
वस्त्रालद्दत्पुरान्तरं १०६ भोग्यं स्याद्योगकृत्कालं वेगपितृ
कुलादिकं स्याद्यस्माद्गुद्ध्वोवेगस्तद्दे गजनकोच्यते १०७
कुलंतुदिनादिजाति र्भवति उदाहरणं नगरान्तरंवति
थिक्रोशोन्मितंयत्र १५० स्वस्वनगराद्वौ पथिकौ एक-
दिनस्यगतिभ्यांदशक्रोशा १० तिथिक्रोशा १५ मितिभ्यां
परस्परं पर नगरंगच्छतः चेत्तयोर्युतिकालं भुक्तं मार्ग-
श्चोन्यतां न्यासः अंतरं १५० क्रोशौ दिनगती १०।१५
गतियोगं २५ लब्धंयोगदिनानि ६ तत्र प्रथमस्यलघुग-

तेरर्थान्मिन्दगते भुक्तमार्गे६० अपरस्य भुक्तमार्ग८० एवंवक्रीमार्गीग्रहयोरपिज्ञेयं अथमिश्रान्तरविधिः भागैर्भक्त हरैक्यात्समेकं पूर्त्तिक्षणं भवेत् उदाहरणं कुर्वन्तिदिन घस्त्रार्द्धत्र्यंशैः कर्म पृथक् पृथक् यंचेतेचे न्मिलित्वातं कुर्वन्तितत्क्षणंवद न्यासः $\frac{1}{1}$ $\frac{1}{2}$ $\frac{1}{3}$ लब्धं क्षेत्रच्छेद नादिकालः $\frac{1}{6}$

अथक्रयविक्रय मिश्रोच्यते

नीचोच्चकुलयोर्मध्येयद्गुणस्तद्द्राहतं १०८ कृत्वानी चकुलस्यैव फलंतत्तुङ्गवद्भवेत् स्वमौल्याःस्वांशकै र्निघ्नास्तौल्यात्प्तास्तेलवाअपि १०९ स्युर्मिश्रघ्नाःफलै क्यात्प्ताः मौल्यास्तौल्याः पृथक् पृथक् उदाहरणं तण्डु- लाः विपणौ निष्केणपादेनेनतौल्येचतुर्विंशत् मिताः लभ्यन्ते तथा निष्केणमौल्येनतौल्येषोडशोन्मिताः मा- षाः लभ्यन्ते तथानिष्कार्द्धेन मौल्येनतौल्येवेदोन्मिताः मुद्गाः लभ्यन्तेचेत्पंचाक्षिरूपैर्भागैस्ताक्षिष्क पादेन आंदीयताम् न्यासः क्रमात्तौल्यानि तत्त ण्डुलानां २४

माषानां १६ मुद्गानां ४ मौल्याश्चतण्डुलानां $\frac{३}{४}$ मा-
षानां १ मुद्गानां $\frac{१}{२}$ तण्डुलभागाः ५ माषभागौ २
मुद्गभागः १ स्वमौल्याःस्वस्वभागघ्नाः | $\frac{१५}{४}$ | $\frac{२}{१}$ $\frac{१}{२}$ |
तौल्याप्ताः | $\frac{५}{३२}$ $\frac{१}{८}$ $\frac{१}{८}$ | फलैक्यं $\frac{१३}{३२}$ मिश्रं $\frac{१}{४}$ त-
ण्डुलमौल्यं | $\frac{५}{१३}$ | तण्डुलतौल्य $\frac{४०}{१३}$ माषमौल्यं $\frac{१}{१३}$
माषतौल्यं $\frac{१६}{१३}$ मुद्गमौल्यं $\frac{१}{१३}$ मुद्गतौल्यं $\frac{८}{१३}$ यथा
षोडशद्रम्मानामेकोनिष्कोभवतिद्रम्माधोदेशस्थमे-
कादिकं हरंषोडशाहतंकत्वातस्माद्द्राम्मान्निष्कजा-
तिफलंभवतीतिपूर्वज्ञेयं अथवा एतस्मिन् क्रयविक्र-
यगणिते इष्टकर्म्मणाफलयोगासंमिश्रसेकस्यमानं
स्यात्पुनस्त्रैराशिकेण एकस्येदंचेदेषांकिमिति .

अथ रत्नमिश्रक्रमः

नरदानवधेनोनरत्नशेषैर्विभाजितम् ११० इष्टंवाशे-
षरत्नैस्तुशेषरत्नाहृतिंभजेत् लब्धंतत्स्वस्वकैकैकर-
त्नमौल्यमुदीरितम् १११ तस्मात्तुल्यधनाः सर्वेजाय-
न्तेतेह्निमानवाः उदाहरणं मुक्ताःबाणान्नगाः वज्राः

मणयः सागराः धनाः रामाणांमिथएकैकदानात्तुल्य-
धनान्वद न्यासः ५।७।४ दानं १ नराः ३ नरदान
वधेन ३ स्वस्वरत्नसंख्यावर्जिताशेषरत्ना मुक्ता २ व-
ज्रा ४ मणिः १ इष्टं ८ प्रकल्प्य स्वस्वरत्नशेषैरिष्टं ८
भक्त्वा स्वस्वैकैकरत्नमौल्यंजातं सु· ४ व·२ म· ८
मुक्तानांमौल्यं २० व· १४ म· ३२ अतोसमधनानि·
२२।२२।२२ एकैकदानात्स्वस्वरत्नशेषाणिमुक्ता ३
वज्राः ५मं· २ यथामुक्तारत्नीनरेणैकं वज्रीनरायए
कंमणियुक्तायदत्तंतर्हितद्रत्नशेषं ३ एवंवज्रीनरेणै
कंमुक्तारत्नीनराय एकंमणियुक्तायदत्तं तर्हितद्रत्न
शेषं ५ एवं एकं प्रथमाय एकं द्वितीयायदत्वा तृतीय-
स्यमणिशेषंजातं २ अथवा शेषरत्ना |मु·२|व·४|म·१|
हतिं शेषरत्नै र्भक्त्वास्वस्वरत्नमौल्या. मु·४ व·२ म·८
समधनानि २२।२२।२२

अथसुवर्णानादीनांक्रयविक्रयविधिः

एकैकस्यतुस्वर्णस्यैवमौल्यं (वर्ण) तत्तौल्यताडितं ११२ कृत्वातेः

द्यांयुतिर्भाज्यंविज्ञेयंगणकोत्तमैः तौल्यानामेवयोगेन भक्तं
भाज्यंचयत्फलं ११३ तौल्यानांयोगमध्येतुमौल्यमेकस्य
तद्भवेत् तदेवचैक्यवर्णः स्यादैक्यमौल्यंचतन्द्भवेत् ११४
मलसंयुक्ततौल्यानांयोगमध्ये कुमौल्यकं (वर्ण) मलयुक्तौल्य-
योगेनहृत्वाभाज्यमुदीरितम् ११५ तच्छोधितेन तौ-
ल्येनभक्तंलब्धंफलंभवेत् एकस्यशुद्धमध्येतुतन्मौल्यंज्ञा (वर्ण)
यतेखलु ११६ शुद्धस्यैवैकमौल्येन भाज्यंतत्परिभाज-
येत् शुद्धतौल्योच्यतेस्वर्णान्नादीनांक्रयविक्रये ११७
तौल्यैक्येचैवमौल्यघ्नेतौल्यमौल्याहतेयुतिं (वर्णभाइइतिभाषायां) हित्वाविदि-
तमौल्यस्य तौ ल्यासंयत्फलं भवेत् ११८ तत्फलंमौल्य-
मानंतुचाज्ञातस्यहिजायते ऐक्यमौल्यघ्नतौल्यैक्येवि-
श्लेपंचसमाचरेत् ११९ तौल्यमौल्यवधैक्यस्यतच्छेषं
चसमुद्धरेत् भेदेनैक्याज्ञातमौल्ययोर्फलंयत्प्रजायते
१२० अज्ञातमौल्यमानंतुतज्ज्ञेयंगणकोत्तमैः उदाहर
णं यस्यैकमाषकस्य सुवर्णस्य मौल्यं युग्मोन्मितं त-
त्सुवर्णमष्टमाषोन्मितं यस्यैकमाषकस्यमौल्यंवेद तुल्यं-

तदप्यष्टमाषोन्मितं यस्यैकमाषकस्यमौल्यंवसुमितं तद्वेदयुग्ममाषोन्मितंचेत्तदैक्यवर्णवद् तत्रस्त्रवर्णस्थानेऽत्रन्नादिकं माषस्थानेसेटकादिकंज्ञात्वा एतदुदाहरणे अन्नादीनामैक्यवर्णवद् अथवा एतस्मिन्नुदाहरणे सर्वेमाषाः ४० अथवासेटकाः ४० मलयुक्ताश्चेच्छोधनात्रिंश ३० न्मिताः जाताः तदैक्यवर्णवद् अथवातन्मध्ये एकस्यमौल्यमज्ञातंचेत्तन्मौल्यंवद् अथवा एकस्यतौल्यमज्ञातंचेत्तत्तौल्यंवद् न्यासः

मौ/तौ	२/८	४/८	८/२४

ऐक्यवर्णः ६ भाज्यं २४० शुद्धैक्यवर्णं ८ शुद्धतौल्यं ३० अन्यन्यासः

२/८	०/८	८/२४

मौल्यंजातं ४ अथवा अन्यन्यासः

२/८	४/८	८/०

तत्रोक्तवत्करणाल्लब्धंतौल्यं २४ द्वितीयोदाहरणे तौल्यैक्ये ४० ऐक्यमौल्ये ६ नघ्ने २४० तौल्यमौल्याहृति १६।०।१९२ युतिं २०८ हित्वाशेषमज्ञात०स्यतौल्या ८ समज्ञातमौल्यमानंजातं ४ तृतीयोदाहरणे ऐक्यमौल्यं ६ तौल्यैक्यं १६ ऐक्यमौल्यघ्नतौल्यैक्ये ९६

नी॰२ नी॰८ वर्ण १६ मौ॰४ नी॰८ वर्ण ३२ मौ॰८ नी॰ वर्ण॰ वर्णयोग ४८
वर्णं तौल्यमौल्यघाः १६।३२।० योगं ४८ अस्य ९६ अ-
न्तरं कृत्वा शेषं ४८ ऐक्यमौल्य ६ अज्ञातमौल्य ८ योर्भे
देन २ भक्तं लब्धं २४ जातं तौल्यं २४

अथ मिश्रमध्ये एकद्वित्र्यादि भेदानयनविधिः

क्रमस्यैकचृतानंकान्व्यस्तानेकोत्तरस्थितान् १२१ सि-
द्धेर्नमिजपूर्वेण हत्वा तस्माद्यथाक्रमं एकद्वित्र्यादि भेदाः
स्युरिदं साधारणं मतम् १२२ उदाहरणं एकद्वित्र्याद्या-
द्यषड्रसभेदान्वद न्यासः $\frac{6}{1}$ $\frac{5}{2}$ $\frac{4}{3}$ $\frac{3}{4}$ $\frac{2}{5}$ $\frac{1}{6}$ क्रमा-
ज्जाताः ६।१५।२०।१५।६।१ मिष्ट अम्ल लवणक
कटुक तिक्त कषाय रसानामेषां योगं षड्रसभेदाः ६३
इति मिश्र व्यवहारः समाप्तः

अथ श्रेढीव्यवहारः

तत्र संकलित विधिः गच्छार्द्धसैकगच्छघ्नमेकाद्यंक युति
र्भवेत् तत्संकलितसंज्ञः स्यात्द्वत्वातेनाब्धियुक् पदं १२३
त्र्यासंसंकलितानांतु योगं ज्ञेयं विचक्षणैः गच्छं द्विगुणि-
तं सैकं कृत्वा संकलिताहतं १२४ रामासमेकपूर्वाणां

वर्गाणामैक्यमुच्यते एकदीनां धनैक्यंस्याद्वर्गसंकलि-
तस्यच १२५ उदाहरणं एकादीनांपंचपर्य्यन्तानांचतु-
ष्कमन्विद् न्यासः १।२।३।४।५ संकलितानि १।३
।६।१०।१५ एषामैक्यानि १।४।१०।२०।३५ वर्गैक्या-
नि १।५।१४।३०।५५। धनैक्यानि १।९।३६।१००।
२२५.

अथश्रेढ्यन्तर विधिः

वृद्धि ध्नव्येकगच्छन्तुसाद्यमन्त्यधनंभवेत् आद्यन्त्यै
कदलंमध्यंसर्वस्मध्यपदाहृतिः १२६ सर्वगच्छोद्धृतंव्ये-
कगच्छघ्नार्द्धचयोनितं आदिस्तदुच्यते सर्वगच्छासं
सुखवर्जितम् १२७ व्येकगच्छदलेनासंवृद्धिः स्यान्त-
च्चयोत्तरः द्विघ्नसर्वचयघ्नंचंवृत्तराद्धे सुखान्तरात् १२८
वर्गाढ्यतत्पदंचादिहीनमर्द्धचयान्वितम् उत्तरेणोद्धृतं
लब्धंगच्छंज्ञेयंचतत्पदं १२९ उदाहरणम् वक्रेरासं
चयेयुग्मंगच्छंयत्रयुगोन्मितं तत्रतर्कोन्मितान्कर्मानिह्नी-
घ्नंब्रूहिविचक्षण न्यासः आदिः ३ चयः २ पदं ४ अन्त्य-
धनं ९ मध्यधनं ६ आदिधनं ३ सर्वधनं २४.

अथद्विगुणचयादिफलानयनश्रेढ्यंतरविधिः

ओजेगच्छेत्तदेकोनेगुणलक्षणमालिखेत् तुल्येतद्दलिते-
वर्गचिन्ह्मेवंसमालिखेत् १३० तद्गच्छक्षयपर्यन्तंक्र
न्यान्त्येगुणकोभवेत् व्यस्तात्तद्गुणवर्गोत्थंफलमेकेनव-
र्जितं १३१ एकोनगुणकेनाप्तंकृत्वालब्धंमुखाहतं त-
त्सर्वगणितंज्ञेयंधीरैस्तत्रगुणोत्तरे १३२ उदाहरणं-
आदिर्नेत्रोन्मितंयत्रचोत्तरंत्रिगुणोन्मितं गच्छंपंचो-
न्मितंतत्रसर्वंब्रूहिविचक्षण तद्वृत्तकौन्मितेगच्छेसर्वं
ब्रूहिविचक्षण न्यासः आदिः २ चयः ३ गच्छः ५ वल्ली

५	गच्छ	
४	गु	२४३
२	व	८१
१	व	९
०	गु	३

गुणवर्गजंफलं २४३ व्येकं २४२ व्येक
गुण २ भक्तफलं १२१ आदि २ गुणं
जातं सर्वधनं २४२

अथसमादिवृत्तज्ञानायश्रेढ्यंतरविधिः

गच्छंपादाक्षरमितंद्विगुणंतुचयंभवेत् पूर्ववद्यदधःस्था-
नाद्गुणवर्गभवंफलं १३३ भेदानांसमवृत्तस्यसंख्या-
ज्ञेयाविचक्षणैः तद्वर्गोनिजमूलोनंवृत्तस्यार्द्धसमस्यहि

१३४ समवृत्तस्य भेदानांसंख्यावर्गकृतोतथा भेदानांस-
मवृत्तस्यसंख्यावर्गपरित्यजेत् १३५ संख्यास्यादोज
वृत्तस्य भेदानांनिजच्छन्दजा उदाहरणं तुल्यानामर्द्ध
समानांविषमाणांवृत्तानांपृथक् पृथक् अनुष्टुप्छंद
सिभेद संख्यांवदन्यासः उत्तरोद्विगुणाः २ गच्छं ८ वल्ली

४ वर्ग
२ वर्ग
१ वर्ग
– गुण

गुणः २ वर्गः ४ वर्गः १६ व २५६ गुणवर्गजंफ-
लं २५६ समवृत्त भेदानांसंख्या २५६ अ
स्यवर्गं ६५५३६ स्वमूलोनं २५६ अर्द्धस-
मवृत्तानां भेद संख्या ६५२८० अथ २५६ वर्ग६५५३६
अस्यवर्गं ४२९४९६७२९६ अस्यमूलं हित्वा विषमवृ-
त्तानां भेद संख्या ज्ञाता ४२९४९०१७६० अष्टाक्षरप-
दस्यसमवृत्तभेदसंख्या २५६ अर्द्धसम भेदसंख्या ६५-
२८० विषमवृत्त भेदसंख्या ४२९४९०१७६०

अथसमवृत्तादिपरिज्ञानम्

चत्वारश्चरणा यस्यचिह्निताःस्तुल्यलक्षणैः १३६ तु-
ल्यवृत्तोदितस्तत्तुच्छन्दःशास्त्रविशारदैः तृतीयमादिव-

द्यस्य द्वितीयमन्त्यवद्भवेत् १३७ तत्खण्डसमवृत्तं स्यान्नह्निनंविषमंभवेत् इतिश्रेढीव्यवहारः समाप्तः

अथक्षेत्रव्यवहारः

शून्यचिह्नविचारार्थेबिन्दुः शून्यंविलिख्यते १३८ स्थानमात्रं भवेद्यस्य भागमात्रं भवेन्नहि तच्छून्यंगीयतेयस्याभावश्चेद्विस्तृतेस्तथा १३९ दैर्घ्यस्यस्थानमात्रःस्यान्नतु भागकरोच्यते वेधाभावोभवेद्यत्रतत्रक्षेत्रोनिगद्यते १४० वृत्तेयदिच्छयाव्यासौव्यस्तबाणसमौबुधैः दत्वातद्व्यासयोर्योगस्थानंकेंद्राभिधंमतं १४१ वृत्तकेंद्रन्यासः दोःकोट्याकारगारेखाकर्णरूपगतायथवा ऋजुनन्तुसमारेखाख्याताजगतिमन्यतं १४२ विद्युद्रूपगतारेखाशंखावर्त्तगतापिच चापरूपगताचैवव्यंगरेखानिगद्यते १४३ नृणांमस्तकदेशास्थियोग संधिस्थलंगतायारेखाकुण्डलाकारा चित्ररेखातुसास्मृता १४४ तत्रोर्द्धाधोस्थियोगस्यमस्तकस्थस्यपेचकैः

सूचीरूपसमैश्चित्ररेखा भवतिमस्तके १४५

अथभुजकोटिकर्णज्ञानम्

तिर्य्यग्भुजं भुजंज्ञेयं कोटिस्तूर्ध्वभुजोच्यते कोटिबाह्व ग्रयोर्मध्ये यत्सूत्रं तच्छ्रवोच्यते १४६ दोर्वर्गात्कोटिवर्गाढ्यान्मूलं तच्छ्रवणोभवेत् कोटिवर्गोनितात्कर्णवर्गान्मूलं भुजंभवेत् १४७ दोःकर्णवर्गयोर्भेदान्मूलं कोटिस्तदुच्यते उदाहरणं कोटिर्वेदोन्मिता यत्र बाहुस्त्वग्निमितस्तथा कर्णः पंचोन्मितं तत्र शीघ्रं कर्म्मत्र यंवद न्यासः

कोटि	कर्णः
	भुजः

कोटिः ४ भुजः ३ कर्णः ५

अथसमकोटिभुजकरणम्

ओजदोः कोटिघातोत्थं मूलं यत्स्यात्कृतेरिव १४८ तत्कोटिभुजयोस्तुल्यं मानंज्ञेयं विचक्षणैः उदाहरणं यत्र भूपोन्मिताकोटिः १६ नवबाहु ९ स्तत्रसमभुजकोटीवदकोटिः १६ भुजः ९ वधं १४४ मूलं १२ समभुज १२ कोटि १२ **अथसमकोटिभुजवेधानामानयनविधिः** ओजदोः कोटिवेधानां घातान्मूलं घनादिव १४९ यत्त

द्वोः कोटिवेधानांतुल्यंमानंतदुच्यते उदाहरणं यत्रद्वाद-
शकोटिः १२ नव९ भुजः युग्मो २ न्मितंवेधंतत्रसमकोटि
भुजवेधान्वद न्यासः कोटिः १२ बाहु ९ वेधः २ घातः
२१६ मूलं ६ सममानं भुजः ६ कोटिः ६ वेधः ६ आ-
सन्नमूलानयनं लब्धवर्गान्तरंकृत्वासैकलब्धकृतोह्-
रः १५० स्याद्धरेणोद्धृतंमूलस्यावशेषन्तुतत्फलं स्या-
न्मूलकुलजंतत्तुवर्गासन्नपदम्भवेत् १५१ सैकलब्धध-
नेकृत्वाभेदंलब्धधनस्यच तेनाप्तं धनमूलस्यत्ववशेषं
फलंभवेत् १५२ तद्युतासन्नमूलंस्याद्भिन्नवर्गेधनेत-
था हारांशवधमूलंतुहाराप्तंतत्समीपजं १५३ वर्गमू-
लंतुविज्ञेयं घनमूलंचपण्डितैः उदाहरणं सार्द्धवेदस्य
वर्गमूलंतथाघनमूलंचवद न्यासः $\frac{९}{२}$ हारांश २।९ घा-
त १८ मूलं ४ मूलावशेषं २ मूल ४वर्गं १६ सैकमूल ५
वर्गं २५ वर्गा |१६।२५|न्तरं ९ तेनाप्तंमूलावशेषंजातं
$\frac{२}{९}$ मूलयुतंजातं $\frac{३८}{९}$ हाराप्तंजातं भिन्नवर्गेनिकटमू-
लं $\frac{१९}{९}$ अन्यन्यासः धनः $\frac{९}{२}$ हारांश २।९ घात१८

सूलं २ मूलावशेषं १० मूलधनं ८ सैकमूल ३ धनं २७ धनयो ८।२७ रन्तरेण १९ सं मूलावशेषंजातं $\frac{१०}{१९}$ मूलयुतंजातं $\frac{४८}{१९}$ हार२ भक्तंजातंभिन्नधने निकटमूलं $\frac{४८}{३८}$ सूक्ष्ममूलानयनंतुज्योत्पत्तिस्थानेकथयामि **अथाऽकरणीगतेष्टभुजात्कर्णकोटिरचनो-च्यते.** इष्टाप्तमिष्टदोर्वर्गलब्धमिष्टाद्यवर्जितं १५४ कृत्वाखण्डे भवेतांतौकर्णकोटीत्वनेकधा इष्टयोर्वर्गभेदन्तु बाहुः स्यादिष्टयोस्तयोः १५५ वर्गयोगन्तुतत्कर्णस्यात्तच्चाऽकरणीगतं व्येकेनहीष्टवर्गेण भक्तं द्विघ्नेष्टताडितं १५६ दोः संज्ञंस्यात्तुकोटिस्सात्विष्टघ्नीत द्भुजोनिता तज्जात्यंजायतेकर्णंचाथकर्णयमाहृतम् १५७ हीष्टघ्नंत्विष्टवर्गेणसैकेनाप्तन्तुजायते कोटिकोटिगुणंत्विष्टंकृत्वातच्छ्रवणेन्तरम् १५८ दोः स्याद्वात्विष्टयोर्घातं द्विघ्नंकोटिस्तदुच्यते उदाहरणं यत्रस्येष्ट भुजंद्वादशांतत्रकर्णकोटीवद न्यासः इष्टभुजः १२वर्गः १४४ इष्ट २ भक्तः ७२ इष्टेन २ युक्तोनार्द्धीकृतः कर्ण

कोटी ३७।३५ एवमिष्टवशाद्बहुधाकर्णकोटी स्यातां अथवा इष्टं भुजमिष्टकोटिरितिज्ञात्वा उक्तवत्कृत्वा कर्णभुजौ स्याताम् अथप्रकारान्तरेणेष्टकर्णाद्भुजकोट्योरानयनम् इष्टवर्गेणसैकेन द्विघ्नकर्णो विभाजितं १५९ फलमिष्टाहतंदोः स्यात्कोटिः कर्णफलान्तरं उदाहरणम् यत्रतिथिमितंकर्णंतत्र भुजकोटीवद् न्यासः कर्णः १५ द्विघ्नः ३० इष्टः २ वर्गः ४ इष्टवर्गेणसैकेन ५ द्विघ्नकर्णः ३० भक्तः फलं ६ इष्टाहतंफलं १२ भुजः १२ फलकर्णान्तरंकोटिः ९ इष्टवशाद्बहुधा.

अथकर्णकोटियुतिबाहुभ्यां कर्णकोटिज्ञानमथवा भुजकर्णैक्यकोटिभ्यां कर्णभुजानयनं विरच्यते

कोटिवर्गोथवाबाह्वोर्वर्गः खण्डोचितोद्धृतः १६० लब्ध्या खण्डोचिते द्विस्थेहीनयुक्तेदलीकृते खण्डे द्वे खण्डयोगस्य विज्ञेये दोः श्रवाकृती १६१ ते कोटिकर्णरूपे वा ज्ञेयेखण्डे विचक्षणैः यस्य खण्डानि खण्डेवा स्युस्ततख-

भुजकर्णरूपे

एडोचितोच्यते १६२ उदाहरणं अष्टकरतुल्यदीर्घवं-
शोवायुनैकदेशेभग्नः स्वमूलादब्धिकरे भुजेतदग्रख
एडः श्रुतिरूपलग्नश्चेत्कर्णकोटिरूपेवंशखण्डे वद न्या-
सः | ३ ५ | बाहुः ४ वर्गः १६ खण्डोचितेन
८ भक्तः फलं २ अतोवंशखण्डेकोटिकर्णरूपे कोटिः
